CC-O. In Public Domain. Digitized by eGangotri

सर्वेषां दर्शनानां अद्वैते तात्पर्यम्

(WITH ENGLISH TRANSLATION)

THE ADVAITIC IMPORT OF ALL DARSANAS

BY

Vidyanidhi, Panditaraja, Vadasardula, Vidya Vachaspati
Pandita Ratna, Brahmasri V. S. RAMACHANDRA SASTRIGAL

BHARATIYA VIDYA BHAVAN
BOMBAY 400 007
1977

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

Rs 15=00

CC-O. In Public Domain. Digitized by eGangotri

सर्वेषां दर्शनानां अद्वैते तात्पर्यम्

(WITH ENGLISH TRANSLATION)

THE ADVAITIC IMPORT OF ALL DARSANAS

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सर्वेषां दर्शनानां अद्वैते तात्पर्यम्

(WITH ENGLISH TRANSLATION)

THE ADVAITIC IMPORT OF ALL DARSANAS

His Holiness Sri Kanchi Kamakoti Peetadhipathy Jagadguru

Sri Sankaracharya Chandrasekharendra Saraswati

Sathabhishekam Commemoration Lectures

(*Second Series*)

BY

Vidyanidhi, Panditaraja, Vadasardula, Vidya Vachaspati
Pandita Ratna, Brahmasri V. S. RAMACHANDRA SASTRIGAL

BHARATIYA VIDYA BHAVAN
BOMBAY 400 007
1977

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri
© Bharatiya Vidya Bhavan
Bombay 400 007.

Published by S. Ramakrishnan,
at the Bharatiya Vidya Bhavan,
Bombay 400 007.

Printed in India at
Kalakshetra Publications Press,
Madras-600 041.

Samskrit Printed at
Ramani Bros. Printers,
Madras-600 018.
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri



The image of Sri Sankara Bhagavatpada
(in the Sri Kamakshi Shrine at Kanchi)

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

PUBLIS HER'S NOTE

To commemorate the Sathabhishekam of His Holiness Sri Chandrasekharendra Saraswati Swamigal which took place on the 25th of February 1975. the *Bhavani Charitable Trust, Madras-6,* generously came forward with an Endowment for delivering lectures associating them with the name of His Holiness. The Bharatiya Vidya Bhavan, Madras Kendra, has gratefully accepted the Endowment.

The general scheme and purpose of the Endowment and some of the details of the spiritual ministry of the holy personage with whom it is associated will be found from the following pages i to vii.

The first lecture under this Endowment was delivered in English on the 12th and 13th of December 1975 by Dr. D.V. Gundappa on **Advaita Faith and Practice.**

This, the second Endowment lecture in Samskrit, is published along with a free translation in English by Dr. M. Narasimhachary.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

OM

SRI GURUBHYO NAMAH

Sri Adi Sankara, reverentially adored as Sri Bhagavatpada, was a luminary of everlasting radiance in the spiritual firmament of India whose light has travelled through the centuries to the far corners of the globe.

After expounding the Truth of Advaita and securing its strength and solidarity on the firm foundation of his *bhashyas* on the *Prasthanatraya*, to ensure that the tradition of his teachings was preserved aud transmitted to future generations by precept and by example. Sri Sankara established, wherever his mission took him in Bharata Varsha, he *sishyas* that he had gathered under him through the years who could speak with the authentic voice of their discipleship to him and be exemplars of the way of life that he had promulgated. Such seats of religion were the Mutts or monasteries that he founded which, in course of time, grew to be bastions of the Vedic faith and practices and of the highest reaches of the Advaita philosophy. Of these, five have survived to this day, four in the cardinal corners of the country, and the fifth where, according to one tradition, he stayed in the closing years of his all too brief sojourn on earth and ultimately shuffled his vesture of clay. Through the years, they have been fulfilling their ordained purpose of transmitting the Sankarite tradition undiminished by the passage of time. They functioned from Badari in the North, from Dwaraka in the West, from Puri in the East and from Sringeri in the South, and from the fifth one at Kanchi. Since the time of the great Original,[1] a succession of scholarly and holy personalities have presided over these monasteries which have acquired repute as Advaitic peethas.

[1] Though historians place Sri Sankara in the 8th Century A.D., the traditional date, according to the Monasteries, takes him to the B. Cs.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

II

Of these, the Kamakoti Peetha at Kanchi counts sixtynine personages in pontifical succession to the great Sankara, all of them ripe scholars of Advaita, who transformed their knowledge into experiential anubhava, intense in their devotion to God whom they worshipped in the Yoga Linga of Sri Chandramouliswara, deeply committed to the spiritual education of their disciples and ever concerning themselves with their well-being. Among this galaxy of the renowned occupants of the Peetha, SRI CHANDRASEKHARENDRA SARASWATI SRICHARANĀH, the sixty-eighth in the line, is a person of superlative saintliness the like of whom one comes across only rarely. Called to his august Office in 1907 when he was barely thirteen years of age and initiated into the sannyasic order in a most unexpected way, the transformation overnight of Swaminatha, the High School lad, into Sankaracharya, the World Teacher, was as complete as it was instantaneous.

III

The details of the spiritual ministry of His Holiness, who is generally referred to and reverentially adored as *Periyaval*, during these nearly seven decades have been as diverse as they have been extensively prolific. Deeply rooted in the belief *Vedo'khilo dharma -moolam*, that the Vedas are the source and sanction of all of a man's dharmas, His Holiness has been anxious to establish the Vedas permanently in the utterance and understanding of those qualified to chant them and use them in the practices of their religion. Nothing has caused concern to His Holiness so much as the decline in the number of Vedic scholars and of those competent to officiate at sacramental ceremonies. To this end, he has organized All-India Institutions called the *Veda Dharma Sastra Paripalana Sabha* and the *Veda Rakshana Nidhi Trust*, reviving the declining practice of *Veda Adhyayana* particularly of those *sakhas* of the Vedas whose adherents have dwindled in number in the passage of time. Similarly realising that any Vedic ritual performed with knowledge of the meaning of the mantras employed in it has its efficacy considerably enhanced, His Holiness encourages the study of *Veda Bhashyas* by public recognition of those adept in them and making

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

cash awards both to their teachers and students from time to time. The procedural details in the performance of the samskaras of every Hindu outlined in the *Dharma* and *Grihya Sutras* form subjects of study, the successful completion of which confers on the *vidyarthi* the title of *Dharmajna* or *Grihyajna* as the case may be, and also a cash prize. The *Sashtyabdapurti Trust* and the *Kalavai Brindavan Veda Vidya Trust* are dedicated to the furtherance of these schemes.

IV

The *Advaita Sabha* founded by his Paramaguru in 1895 has been functioning for the past eighty years to promote the study of Advaita Vedanta and a pass in the examination held at the annual sessions of the Vidwat Sadas of the *Sabha* in different parts of the country under his patronage is a coveted distinction. His Holiness honours eminent scholars of Vedanta by the award of the prestigious title of SASTRARATNAKARA. As knowledge of Sanskrit is the foundation of all these acquisitions, His Holiness arranges that pupils are drawn to the study of that language in Schools and Colleges through the institution of *Amara Bharati* which offers encouragement in the shape of scholarships and recognition of proficiency in the subject.

V

In the realm of religion, His Holiness has been stressing the performance of daily rituals like the *Sandhya Vandana* and allied observances and is keen that boys should have their *Upanayana* performed at the prescribed age before lustful thoughts impeding the growth of *Brahmatejas* find lodgement in their hearts. Emphasising the value of community worship in temples in addition to the domestic shrine, he has popularised the renovation of old temples and the construction and consecration of many new ones. For the proper ordering of such places of worship and to encourage the knowledge and practice of the *agamas* and the art of temple architecture, he has been giving a fillip to the traditional *sthapatis* and the practitioners of the *agamas* which regulate temple worship by holding periodic conferences which function as a clearing house of ideas and promote people's interest in and understanding of these cardinal features of temple worship.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

VI

His Holiness has been endeavouring to promote intra-religious appreciation and amity between the *Saivaite* and the *Vaishnavaite* sections of the Hindus by insisting on *Siva-Vishnu-Abheda* making boys and girls sing the Vaishnavaite *Tiruppavai* and the Saivaite *Tiruvembavai* hymns and arranging Conferences for promoting equal devotion to these manifestations of the same God.

The system of weekly congregational prayers, circumambulating the village temples known as *Vaaravazhipaadu* and the Ekadasi discourses in them, which His Holiness recommends, are intended to turn the mind Godward and to foster religious consciousness and habit among men.

VII

His Holiness has not been unmindful of the secular welfare of people both individually and collectively. Anxious to raise the standard of *life* (as distinct from our standard of *living*), he advises every one to cultivate simple habits, to avoid extravagance in marriage, to help indigent parents to perform in time the marriage of their daughters through the *Kanyakadana Trust* that he has commanded to be formed and to avoid the impoverishing practice of demanding dowries. His *Pidiarisi Thittam* is a master-stroke of genius by which every household donates, just a handful of rice and a paisa every day to a common pool to help to cook the rice and distribute it after offering to God in a nearby temple to the needy poor who buy it for just a trifle of their earnings. His *Mudradhikari scheme* is intended to promote joint ventures by the people of a village in digging or deepening their tanks and the care of the village and its temple as a centre of religious and social life.

A group of his disciples is visiting hospitals periodically to distribute holy *prasadam* to the patients to hearten them in their sufferings and, where necessary, to enable the departing souls to take wing with *antima smarana* (lingering last thoughts) of their *ishta devata*. Another group visits prisoners in jails giving them counsel and comfort and reclaiming them as law-abiding citizens

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

of society. Yet another service that is being rendered by his instruction is the *jivatma kainkaryam* whereby the ultimate ceremonies are done to the forlorn dead *to each according to the rites of his religion.*

VIII

His Holiness has also been endeavouring in his own way to bring about joint action by mathadhipatis of all denominations of Hindus to foster *astikya* and religious fervour among all classes of people without encroaching or debating on their theological doctrines and beliefs. He desires each one of us to observe the *anushthanas* appropriate to his nature, stage of life and status, and with a mind disciplined by the process, to be filled with devotion to God in the manner that *each one of us has been accustomed to worship Him by his kulachara.*

IX

His Holiness' devotion to Sri Sankara is a rare example of *Gurubhakti.* He popularised the celebration of Sri Sankara Jayanthi in a scale unknown before his time and caused statues of Sri Sankara with his four disciples to be erected on elevated pedestals in important pilgrim places of India where people can have His saving *darshan* immediately after bathing in the sacred seas or rivers and worshipping in all the holy spots of the land.

X

"In a country without a king, is not to be found the silent eremite who makes his home where the sun sets and walks alone, his senses stilled, seeing the self in the Self" So say the counsellors of Dasaratha when the King is dead praying to Vasishta to see that there is no interregnum.[1] And the Lord tells Arjuna in the Bhagavad-Gita, "when it is night for all the world, the contemplative muni, who sees Brahman, is wide and awake.[2]

---

१. नाराजके जनपदे चरत्येकचरो वशी ।
भावयन्नात्मनात्मानं यत्र सायंगृहो मुनिः ॥

२. यानिशा सर्वभूतानां तस्यां जाग्रति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

These two statements between them may be said to present the Advatic state and its supreme relevance to the life and concerns of men. The jnani brings light and comfort by his mere presence. He is in the world but not of the world. He represents the ideal of impersonal benevolence and is a standing reminder to men that "the Kingdom of Heaven is within you".

In *His Holiness Sri Chandrasekharendra Saraswati Sricharanah* we have a supreme example of Advaita in precept and practice. Millions have basked in his presence and found in it balm for a wounded heart. The fortunate few have been helped to lift their eyes up above the horizon and glimpse the Truth of thuth, thanks to the seasonable word they have been privileged to hear. For them it has been a transporting experience and a permanent possession of immeasurable value. After relinquishing his pontificate to his successor Sri Jayendra Saraswathy Sripadāh, whom he nominated to the Peetha in March 1954 and who is fulfilling its office with conspicuous success, His Holiness has, of late, been living, when he chooses to eat, only on uncooked food, betaken himself to *tapasya* and frequent spells of silence augmenting his spiritual eminence and benedictory greatness.

XI

It is therefore in the fitness of things that a sincere and self-effacing *sishya* of the Acharya should have come forward to endow an annual Lectureship under auspices of the *Madras Kendra* of the *Bharatiya Vidya Bhavan* through the agency of the *Bhavani Charitable Trust* associating it with the name of His Holiness to commemorate his *Satabhishekam* [his having witnessed the waxing (third day) moon a thousand times] to highlight the services of the Sage as the great exemplar of the life lived in the spirit of Advaita. The lectures (two or three in number to be delivered in one or more languages and at different centres) will lay special emphasis on the value of Advaita as a discipline for the making of the whole man, the ideal represented by the words of Srimad Bhagavata *'sarvabhuta suhrt sadhuh maitrah karuna eva cha'*, the man who befriends all life, who, having found the peace that passeth understanding, is full of the milk of human kindness and tender compassion.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

It is intended that the lectures every year, which will be delivered by acknowledged authorities, should deal with one or more special aspects of the large subject as it bears on ethics and religion as well as metaphysics.

The Bharatiya Vidya Bhavan (Madras Kendra) has appointed a Committee to be in charge of the Endowment to select and invite Lecturers, approve the subject, language and the centre (in India and abroad) and generally to carry out the purposes of the Endowment.

T. V. VISWANATHA AIYAR

Chairman, Endowment Committee

Sri Vidyabharathi Book Centre, Sringeri

HIS HOLINESS SRI KANCHI KAMAKOTI PEETADHIPATHY JAGADGURU
SRI SANKARACHARYA DHAKRASEKHARENDRA SARASWATHI SWAMINAH

CC-0. In Public Domain. Digitized by eGangotri



श्रीचन्द्रशेखरयतीन्द्रसरस्वतीनां शान्तान्तरङ्ग कलिताखिल भावुकानाम् ।
काञ्चीपुरीस्थित महोन्नत कामकोटीपीठीमुपाश्रितवतां चरणावुपासे ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

श्रीगुरुभ्यो नमः

सर्वेषां दर्शनानां अद्वैते तात्पर्यम्

यैरिमे गुरुभिः पूर्वं पदवाक्यप्रमाणतः ।
व्याख्याताः सर्ववेदान्तास्तान्नित्यं प्रणतोऽस्म्यहम् ॥
श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादं शंकरं लोकशंकरम् ॥

ओंनमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋषिभ्यो नमो महद्भ्यो नमो गुरुभ्यः ॥

ध्यात्वा पवित्रौ चरणौ चन्द्रचूडयतीशितुः ।
अद्वैतात्मनि तात्पर्यं दर्शनानां निरूप्यते ॥

परमहंसपरिव्राजकाचार्येत्यादिविरुदालंकृतानां तपोमूर्तीनां प्रातःस्मरणीयनामधेयानां वेदवैदिकमार्गजीवातूनाम्, अद्वैतात्मानन्दानुसंधानतत्पराणाम् अनुगृहीतविनेयानां, काञ्चीकामकोटिपीठाधीश्वराणां स्वामिपादानां ध्यानपूर्वकमाधाय शिरस्यञ्जलिं यथामति बहूनां दर्शनानामद्वैतात्मनि तात्पर्यं निरूपयितुमारभे ।

"न चात्रातीव कर्तव्यं दोषदृष्टिपरं मनः ।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥"[1]

इति भाट्टवचनमपि स्मारयामि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(२) श्रीस्वामिपादानां शताभिषेकस्य पवित्रानुस्मरणाय भारतीयविद्याभवनस्य भव्ये प्रत्यवेक्षणे प्रतिहायनं चाल्यमानायामुपन्यासमालायां वत्सरेऽस्मिन् मां नियोजितवद्भ्यो भारतीयविद्याभवनाधिकृतेभ्यः हार्दिकं कार्तज्ञ्यमावेदयामि। ईदृक्षेषु विषयेषु पाश्चात्यपौरस्त्योभयभाषाभिज्ञानामेव नियमनं प्रायशोऽनुभूतचरम्। पाश्चात्यभाषानभिज्ञस्य प्राचीनपद्धत्या कांश्चिदेव ग्रन्थानधीतवतो ममात्र नियोजने नियोक्तृणां पण्डितपक्षपातमन्तरा नान्यो हेतुरिति मन्ये।

(३) सर्वे प्राणिनः सुखमपेक्षन्ते। तदात्मवृत्तीष्यते। नान्यदीये सुखे इच्छा भवति। न हि शत्रुसुखं कोऽपि कामयते। यद्यपि दुःखनिवृत्तिः काङ्क्षिता, तथापि सुखशेषतया तामभिलषन्ति। दुःखमिश्रं सुखं विषसंपृक्तमोदनमिव नेष्टम्। दुःखात्यन्ताभावः स्वाभाविक इति कोऽपि न शिलाभावं प्रेप्सति। नित्यमनित्यं चेति सुखं द्विविधम्। स्रक्चन्दनादिजन्यं सुखं कंचित्कालमवतिष्ठते। यागादिजं सुखं समधिककालावस्थाय्यपि विनाश्येव। स्मरति हि भगवान्, "ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति"[२] इति। "अपाम सोममृता अभूम"[३] इति श्रुतिप्रतिपादितं सोमपानफलममृतत्वमपि न नित्यम्। "आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते" इत्युपबृंहणेन तस्य प्रलयपर्यन्तावस्थानरूपत्वात्। नित्यं सुखं मोक्ष एव। अद्वितीयं ब्रह्मैव मोक्षः। शास्त्रादेव तदवगमः। "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादिश्रुतयः तस्य नित्यत्वे प्रमाणानि। नित्यस्य निरतिशयस्य सुखस्य सत्त्वे तत्प्राप्तये सर्वे प्रेक्षावन्तः प्रयतन्ते। बहुवित्तव्ययशरीरादिश्रमसाध्ये वैषयिके सुखे नश्वरे प्राज्ञः कोऽपि प्रेप्सां न लभत इति न तिरोहितम्।

(४) प्रसिद्धेषु दार्शनिकेषु चार्वाकाः, जैनाः, सौत्रान्तिक-वैभाषिक-योगाचार-माध्यमिक-भेदभिन्नाः सौगताः वेदाप्रामाण्यवादिनः। वैशेषिकाः, नैयायिकाः सांख्याः, योगिनः, पूर्वमीमांसकाः, औपनिषदाश्च वेदप्रामाण्यवादिनः।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

यद्यपि वैशेषिकाः शब्दस्य न पृथक् प्रामाण्यमङ्गीकुर्वन्ति ; अनुमानेऽन्तर्भावं शब्दस्य मन्यन्ते ; तथापि प्रामाण्यमिच्छन्त्येव । वैयाकरणाः साधुशब्दस्वरूप-निरूपणप्रवृत्ता अपि श्रुतीनां प्रामाण्यं निरूपयन्तः स्वशास्त्रस्याद्वितीय-ब्रह्मपरतां व्यञ्जयन्ति । प्रायशो दार्शनिका अद्वितीयब्रह्मस्वरूपो नित्यसुखात्मको मोक्षः स्वस्वशास्त्रस्य पार्यन्तिकं प्रयोजनमिति मन्वते । कामसूत्रप्रणेता वात्स्यायनोऽपि क्षेमप्राप्तिमभिप्रेत्यैव शास्त्रं प्राणैषीत् । अद्वितीयब्रह्मपरता बहूनां दर्शनानामिति संक्षेपेण निरूपणं क्रियते ।

(५) बृहदारण्यकोपनिषदः शंकरभगवत्पादानां भाष्यं प्रसिद्धम् । तत्र "स एष इह प्रविष्टः"[4] इति श्रुतौ, "सः" इति पदं, "यदर्थः सर्वशास्त्रारंभः . . . स एषोऽव्याकृते नामरूपे व्याकुर्वन् ब्रह्मादिस्तम्बपर्यन्तेषु देहेष्विह कर्मफलाश्रयेषु अशनायादिमत्सु प्रविष्टः"[5] इति व्यवृण्वन् भाष्यकाराः । वार्तिककाराः सुरेश्वराचार्याश्च तस्य भाष्यस्याभिप्रायं वर्णयन्तः —

"यदर्थं सर्वशास्त्राणां प्रवृत्तिरतिविस्तरा ।
आत्मज्ञानावतारार्थः सर्वशास्त्रसमुद्यमः ॥
विरोधः सर्वशास्त्राणां स्वाभिधेयव्यपेक्षया ।
निवृत्त्यर्थेऽविरोधित्वादत एतत् समीरितम् ॥
स्वत एव यतः पुंसां प्रवृत्तिः स्वार्थसिद्धये ।
तत्रानुवादि शास्त्रं स्यान्निवृत्तावेव तन्मतिः ॥"[6] इत्याचख्युः ।

(६) उपबृंहितं चैतत् सूतसंहितायां यज्ञवैभवखण्डे अष्टमेऽध्याये[7] —

"वेदाः सर्वे पुराणानि स्मृतयो भारतं तथा ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अन्यान्यपि च शास्त्राणि तथा तर्काश्च सर्वशः ।
शैवागमाश्च विविधा आगमा वैष्णवा अपि '
अन्यागमाश्च विदुषामनुभूतिस्तथैव च ।
अस्मिन्नर्थे स्वसंवेद्ये पर्यवस्यन्ति नान्यथा ॥
बाध्यबाधकतां यान्ति व्यवहारे परस्परम् ।
समुद्र इव कल्लोला इति वेदार्थसंग्रहः ॥ " इति ।

(७) अयमाशयः—

आक्षेपसमाधानादिप्रतिपादनद्वारा अत्यन्तं विस्तृतानामपि वैदिकानामवैदिकानां च दर्शनानां आत्मज्ञानसंपादन एव परमं तात्पर्यम् । पञ्चविंशत्यादिसंख्याभेदभिन्नपदार्थनिरूपणे, प्रत्यक्षादिप्रमाणसंख्यास्वरूपादिविवेचने च प्रतिभात्येव विरोधः । समुद्रप्रभवाणां कल्लोलानां परस्पराघातेऽपि समुद्र एवैकस्मिन् विलीयाविरोधः प्रत्यक्षः । तथा दर्शनानामपि एकेश्वरप्रसूतानां व्यावहारिके विरोधे भासमानेऽपि रागध्वंसद्वारा तत्त्वधीपर्यवसानेनाविरोधः । स्वर्गादौ सुखे प्रेक्षावतां इच्छापूर्वा प्रवृत्तिः स्वाभाविकी । न तत्र शास्त्रापेक्षा । अतः प्रवृत्तिशास्त्रमनुवादकमप्रमाणं स्यात् । स्वर्गादेरनित्यत्व पुरुषार्थाभासस्य तद्धेतोश्च बोधने शास्त्रं प्रतारकमप्रमाणमेव स्यात् । अतः रागद्वेषादिनिवर्तनद्वारा नित्ये निरतिशयसुखे प्रत्यगभिन्ने ब्रह्मण्येव पर्यवसानं शास्त्राणां प्रामाण्यं चेति ।

(८) तत्र चार्वाका एवमाहुः—पृथिव्यादीनि चत्वार्येव भूतानि । किण्वादिभ्यो मदशक्तिरिव देहाकारपरिणतेभ्यः भूतेभ्यः ज्ञानमुत्पद्यते । तन्नाशे ज्ञानमपि नश्यति । " विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति "[8] इति श्रुतिरपि भूतचैतन्यमनुवदति । चैतन्यविशिष्टः काय एवात्मा । स्रक्चन्दनादिजन्यं सुखमेव पुरुषार्थः । दुःखमिश्रतया कथमस्य पुरुषार्थतेति शङ्का न

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कार्या । अशक्यपरिहरत्वात् तस्य । सपलालानि धान्यान्याहरन् कृषीवलः पलालानि परिहाय धान्यमात्रमादत्ते । तथा दुःखं दूरीकृत्य सुखमात्रमुपादेयम् । दुःखसंसृष्टमिति यः सुखं त्यजति बालिशः सः । व्याध्यादिजन्यं दुःखं नरकः । प्रियासंपरिष्वङ्गजं सुखं स्वर्गः । देहोच्छेदो मोक्षः । 'स्थूलोऽहम्, कृशोऽहम्, मनुष्योऽहम्' इत्यादिप्रत्यक्षम् आ गोपालाङ्गनाभ्यः, आ च पण्डितेभ्यः प्रसिद्धं प्रमाणं देहस्यात्मत्वे । मम देह इत्यादिप्रत्यक्षं राहोःशिर इति ज्ञानवत् काल्पनिकभेदेन सूपपादमिति ।

(९) एवं निरूपयतामपि पार्यन्तिकोऽयमाशयः—गौणात्मसु पुत्रभार्यादिषु दृढ आत्मत्वाभिनिवेशः बहूनाम् । स्वपोषितस्य शुनः नाशे स्वयमेव नष्टं मत्वा नितरां खिद्यति । स्वपोषिताया शुन्याः प्रसूतौ स्वभार्यासुखप्रसूताविव हृष्यति । प्रातिवेशिकशुनो नाशे न दुःख्यति । प्रातिवेशिकस्य भार्यायाः सुखेन पुंप्रसवेऽपि न हृष्यति । एतत्सर्वं कस्य हेतोः ? एकत्रात्मत्वाभिनिवेशः, तदभावश्चान्यत्र कारणम् । उक्तं च भगवता भाष्यकृता—"पुत्रभार्यादिषु विकल्पेषु सकल्पेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति"[9] इति । पञ्चसु कोशेषु प्राथमिकस्यान्नमयकोशस्य अत्मताव्यवस्थापनेन बहुषु बाह्येषु पुत्रभार्यासुहृद्बन्ध्वादिषु गौणात्मसु दृढ आत्मत्वाभिनिवेशः निर्मूलितो भवति । गौणात्मसु आत्मत्वाभिनिवेशबाधनं प्रथमं द्वारं सद्ब्रह्मात्माहमित्यधिगम्य मोक्षसौधप्रवेशे । तदित्थं बहूपकृतं चार्वाकेण मुमुक्षूणाम् ।

(१०) आर्हता मोक्षस्वरूपं एवं वर्णयन्ति[10]—

"सर्वस्य कर्मणो यः
क्षयहेतुरात्मनो हि परिणामः ।
ज्ञेयः स भावमोक्षः
द्रव्यविमोक्षश्च कर्मपृथग्भावः" ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति। सर्वस्य ज्ञानावरणादिकर्मणः क्षयहेतुर्य आत्मनः परिणामः असौ भावमोक्षः। सर्वकर्मणामात्मनः सकाशात् पृथग्भावः द्रव्यमोक्षः। सर्वात्मना कर्मसंबन्धराहित्यं मोक्ष इति सिद्ध्यति। उक्तं च जिनदत्तसूरिणा—"क्षीणाष्टकर्मणो मुक्तिर्निर्व्यावृत्तिर्जिनोदिता"[11] इति। निर्व्यावृत्तिः इत्यनेन पुनर्लोकाकाशे आवृत्तिर्निरस्ता। समस्तक्लेशानां तद्वासनानां च क्षये आत्मज्ञानमनावृतं भवति। तदा सुखैकतानस्यात्मन उपरिदेशावस्थानं मुक्तिरिति केषांचिदभिप्रायं माधवाचार्याः सर्वदर्शनसंग्रहे संजगृहुः। सम्यग्दर्शनं, सम्यज्ज्ञानं, सम्यक्चारित्रं च मोक्षसाधनम्। इदमित्थमेवेति निश्चयात्मिका बुद्धिः श्रद्धापरपर्याया सम्यग्दर्शनम्। श्रुतज्ञानं सम्यज्ज्ञानमुच्यते। शुक्लोऽयं, कृष्णोऽयमिति विशेषरूपेण ज्ञानं सम्यज्ज्ञानम्। सम्यज्ज्ञानं प्राप्य कायिक-वाचिक-मानसान् सकलव्यापारान् दूरीकृत्यात्मन्येव स्थिरीभावः सम्यक्चारित्रमुच्यते। चित्तैकाग्र्यं ध्यानं च मोक्षकारणप्राप्तौ हेतुः। ओंकारध्यानमप्युपदिशन्ति[12]—"मा चेष्टत, मा जल्पत, मा चिन्तयत किमपि, येन भवति स्थिरः आत्माऽऽत्मनि रत इदमेव परं ध्यानं भवति" इति। येनायमात्मा निर्व्यापारः सन् ज्ञानानन्दस्वभावे निज आत्मनि रतस्तन्मयो भवति, तत्परमुत्कृष्टं ध्यानमित्युक्तम्। ईदृशो ध्याता, "अयोगकेवली" इत्युच्यते। अस्यां दशायां पुटपाकशोधितसुवर्णवत् आत्मात्यन्तपरिशुद्धः सुखी भवति। आत्मा चैतन्यरूपः सुखमनुभवति, सद्रूपश्चेति स्पष्टमेतन्मते। एष आर्हतसमयः।

(११) पदार्थानां सर्वदास्तित्ववादिनः सांख्याः। नास्तित्ववादिनो माध्यमिकाः। 'पदार्थाः उत्पत्तेः पूर्वं न सन्ति। उत्पत्त्यनन्तरं सन्ति। ततो नाशकोपनिपाते न सन्ति' इति सत्त्वमसत्त्वं चाहुर्नैयायिकाः। 'पदार्थाः सदसद्विलक्षणाः अनिर्वचनीयाः, ब्रह्मैवैकं सद्रूपम्' इति मायावादिनो वेदान्तिनः। एते सर्वे एकान्तवादिनः। एतेषां निराकरणार्थम् अनेकान्तवादो जैनाभिमतः। अयमेव स्याद्वाद इति व्यपदिश्यते। स्याच्छब्दः कथंचिदर्थकः। स्यादस्तीत्यस्य कथंचिदस्तीत्यर्थः।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एवमन्यत्रापि । "नैकस्मिन्नसंभवात्"[13] इत्यधिकरणे निराकृतोऽयं वादः । अनियतसत्त्वासत्त्वादीनां विरोधेनैकस्मिन् धर्मिण्यसंभवः ; वस्तुधर्मत्वे तेषाम् असत्त्वदशायामपि वस्त्वनुवर्तेत । वस्तुस्वरूपत्वे सर्वदा सत्त्वमसत्त्वं च स्यात्, इत्यादिना दूषितः ।

(१२) अस्य मतस्यापि पर्यवसानमद्वैत इति भारतीयदर्शनतत्त्वविवेचकैः श्रीराधाकृष्णार्यैरुक्तं संगृह्यते—

"The Jainas take their stand on the innate nature of the Soul, which can be manifested when the hindrances are removed. Even Kumārila agrees that the soul has a natural capacity for grasping all things and there are ways and means by which we can develop this capacity. If we emphasise this aspect of Jaina Philosophy and remember that there is intuitional knowledge of the Kevalin which is higher than thought, we are led to a monism absolute and unlimited, which would require us to look upon the striving world, where all things roam about midway between reality and nothingness, as unreal. We can look upon the world as real only when we shut out of view the highest aspect of pure spirit. If we recognise it, then the not-self is merely the other of self, some reflection thereof not quite as real as the self, something which is ultimately to be sublated. The world becomes then an appearance created by the force of the not-self. In this way we are led to a severe monism of the type advanced by Śaṅkara. One thing, however, is clear, that it is only by stopping short at a half-way house that Jainism is able to set forth a pluralistic realism".[14]

(१३) शास्त्राचार्यजैनबौद्धदर्शनशास्त्रीत्याद्युपाधिभाजा श्रीमोहनलालमेहता-महोदयेन स्वीये ग्रन्थे जैनसिद्धान्त एवं ज्ञापितः—

"Now, we come to the last stage of spiritual realisation known as parā meaning thereby the highest. The individual now attains ecstasy. His activities are pure and perfect. He gradually annihilates all the

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

obscuring (ghātin) karmas and attains omniscience, the remaining karmas are also destroyed in due course. Consequently all the activities of his body, speech, and mind are stopped. He now becomes inactive (ayogin). This stage can be compared with the nirvikalpaka samādhi of yoga. Immediately after this the self attains the final emancipation which is nothing but the consummation of all spiritual endeavour, the highest stage of spiritual realisation".[15]

एवमार्हतदर्शनस्याद्वैतपर्यवसानमुपपादितम् ।

(१४) संप्रति बौद्धानां दर्शनान्यपि पर्यवस्यन्त्यद्वैते इति संग्रहेण निरूप्यते । बौद्धाः वैभाषिकाः, सौत्रान्तिकाः, माध्यमिकाः, योगाचाराः, इति चतुर्धा विभक्ताः । बाह्यमर्थमभ्युपगम्य तस्य प्रत्यक्षतावादिनो वैभाषिकाः । तस्यानुमेयत्ववादिनः सौत्रान्तिकाः । बाह्यार्थशून्यत्वं विज्ञानमात्रास्तितां च साधयन्ति योगाचाराः । विज्ञानस्यापि शून्यतावादिनो माध्यमिका इति प्रसिद्धिः । आत्मरूपस्य ज्ञानस्यापि विनाशो मुक्तिः माध्यमिकानामिति प्रसिद्धिः । निर्विषयोपरागाया अत एव स्वच्छाया धियः संततिर्मोक्ष इतीतरे बौद्धाः । सर्वत्र क्षणिकत्वभावना, शून्यत्वभावना, दुःखभावना, स्वलक्षणत्वभावनेति भावनाचतुष्टयं मुक्तिकारणम् ।

" अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ "[16] इति ।

ज्ञानस्यैव भ्रमात् ग्राह्यं, ग्राहकं, संवित्तिरिति भेदः कल्पित इति योगाचाराः । ज्ञानस्य सविषयकत्वात्, विषयाभावात् ज्ञानमपि नास्तीति ज्ञानार्थोभयशून्यत्ववादिनो माध्यमिकाः । क्षणिकत्वं—द्वितीयक्षणे विनश्वरत्वम् । अर्थानां क्षणिकत्वं दुःखरूपत्वं च बन्धकेषु तीव्रवैराग्यसंपादनार्थमेव । विषयाणां स्थिरत्वे, सुखत्वे, सुखसाधनत्वे वा तानिच्छेत् । प्रतिक्षणविनश्वरत्वे न तेष्विच्छोदेति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विनश्यदवस्थापन्नमश्वं कः क्रीणीयात् ? । शिष्यबुद्धिपरिपाकानुसारं बुद्धस्योपदेशः । "देशना लोकनाथानां सत्त्वाशयवशानुगाः"[17] इत्याहुः । अत्यन्तबहिर्मुखानां वैराग्यं संपिपादयिषुः तेषां क्षणिकत्वं निरूपयामास । उत्पन्नबाह्यविषयवैराग्याणां तीव्रवैराग्याय ज्ञानानामपि क्षणिकत्वादिसमर्थनं भगवतो बुद्धस्य । तीव्रं वैराग्यमपेक्षितं तत्त्वज्ञानाय मोक्षहेतवे । बाह्यार्थनिह्नवो न बुद्धसंमतः । स्थिरस्यात्मनो ज्ञानरूपस्य निराकृतावपि न तस्य तात्पर्यम् । मीमांसाश्लोकवार्तिककृता भट्टपादेन निरालम्बनवादे—

"धर्माधर्मविभेदे च नासिद्धे परमार्थतः ।
शिष्यात्मनोश्च धर्मादेरुपदेशोऽवकल्पते ॥
तदनुष्ठानतो बुद्धैरिष्टो भेदः स्फुटं च तैः ।
सूत्रान्तरेऽभ्युपेतत्वात् . . . . . "[18]

इत्युक्तम् । न्यायरत्नाकरकृता पार्थसारथिमिश्रेण—"साक्षादेव बाह्यसद्भावः सधर्मसमाख्याते सूत्रे बुद्धेनोक्तः"[19] इत्युक्तम् । वार्तिकव्याख्याता सुचरितमिश्रश्च—"क्वचित् सूत्रविशेषे स्फुटमेव तैर्बाह्यार्थोऽभिमतः यदाश्रित्य सौत्रान्तिकेन बाह्यार्थसद्भावोऽङ्गीकृतः"[20] इत्याह । अतो बौद्धैर्बाह्यार्थानां क्षणिकत्वसाधनं, तेषामपह्नवः, ज्ञानानां क्षणिकत्ववर्णनमित्येवमादिकं तीव्रतमवैराग्यसंपादनायैव ।

(१५) अयमाशयो भट्टपादेन निरालंबनवादान्ते स्फुटीकृतः—

"युक्त्यानुपेतामसतीं प्रकल्प्य
यद्वासनामर्थनिराक्रियेयम् ।
आस्थानिवृत्त्यर्थमवादि बौद्धैः
ग्राहं गतास्तत्र कथंचिदन्ये ॥"[21] इति वदता ।

वार्तिकमिदं सुचरितमिश्रेणैवं व्याख्यातम्[22]—"इयं वासना तत्त्वदर्शिभिः बौद्धैर्वस्तुतो वर्णितेति नेदं संभावयामः । असतीमेव तु युक्त्यानुपेतां युक्तिशून्यां वासनां विकल्प्य विषयेष्वास्थां निवर्तयितुमर्थनिराकरणमुक्तम्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

'एकमेवाद्वितीयम्'[23] इत्याद्युपनिषद्भिरिव। तत्रैव त्वर्वाचीनानां भ्रान्त्या सिद्धान्तावग्रहः" इति। सुचरितमिश्रस्य 'एकमेवाद्वितीयम्' इति श्रुत्युदाहरणं मीमांसकदृष्ट्या, तैरात्मनानात्वोपगमेन अद्वितीयत्वानङ्गीकारात्। मीमांसकानामपि तात्पर्यमद्वैत इत्युत्तरत्र निरूपयिष्यते। युक्त्यानुपेतामिति वार्तिकं विवृण्वानः भट्टोम्बेकः[24]— "बौद्धमपि दर्शनं तात्पर्येण नावगतमित्याह-युक्त्यानुपेतामिति। स हि बुद्धस्तत्त्वदर्शी नाम कथमपि युक्त्यानुपेतां तत एवासतीं वासनां प्रकल्प्य, लोकयात्रासिद्धयङ्गतयायतत, यथाकथंचिद्रागपरो लोकः संग्राह्य इति। बुद्धेनोक्ते तत्रान्यथैवातत्त्वदर्शिनो मामिनिविष्टा भूत" इति। तत्त्वदर्शिभिर्बौद्धैरिति सुचरितमिश्रोक्तिः, बुद्धस्तत्त्वदर्शी नाम इति भट्टोम्बेकोक्तिश्च विभावनीये। बाह्यार्थस्य सत्त्वेऽपि तस्य सांवृतं सत्त्वमाचक्षते न च पारमार्थिकताम्। मुक्तौ "धीसंततिः स्फुरति निर्विषयोपरागा" इत्यभ्युपगमेन विषयाणामभानात् दृष्टनष्टस्वरूपाणां मिथ्यात्वम्। मिथ्यात्वमेव सांवृतं सत्त्वमित्यनेन शब्दान्तरेणोच्यते। आलयविज्ञानसंततिः आत्मेति वदन्तोऽनादिवासनानामाधारत्वमभ्युपगच्छन्तोऽक्षरमविनाशिनमात्मानं छद्मना अङ्गीकुर्वन्त्येव। तथा च ज्ञेयानां सांवृतं सत्त्वं मिथ्यात्वं, विज्ञानस्य पारमार्थिकं सत्त्वमिति योगाचाराणामपि मतमद्वैतपर्यवसायि।

(१६) किमर्थं तर्हि सर्वभावानां क्षणिकत्वसाधनम्? दृढं वैराग्यं संपादयितुमित्युक्तम्। विवक्षितसिद्धयेऽन्यथापि प्रतिपादनं शास्त्रकाराः कुर्वते। मीमांसासूत्राणां भाष्यकृतः शबरस्वामिनः ज्ञानस्यानुमेयतामाहुः औत्पत्तिकसूत्रे[25]— "पूर्वं बुद्धिरुत्पद्यते, न तु पूर्वं ज्ञायते। भवति हि कदाचित् यत् ज्ञातोऽप्यर्थः सन्नज्ञात इत्युच्यते। न चार्थव्यपदेशमन्तरेण बुद्धेः रूपोपलम्भनम्। तस्मान्न व्यपदेश्या बुद्धिः। अव्यपदेश्यं च न प्रत्यक्षम्। तस्मान्न प्रत्यक्षा बुद्धिः" इति। अर्थसम्बन्धमन्तरा बुद्धिः न ज्ञायते। अतोऽर्थं ज्ञात्वा तन्निष्ठज्ञाततया बुद्धिरनुमेयेत्याशयः। ज्ञातत्वं ज्ञानविषययोः संबन्धः अर्थनिष्ठः स्वप्रकाशः; अतो नागवस्थावकाशः। मानसप्रत्यक्षविषय इत्यपि वदन्ति। वस्तुतस्तु ज्ञानं स्वप्रकाशं ज्ञाततावत्। न हि उत्पन्ने ज्ञाने कश्चिदपि संदिग्धे जानामि न वेति; न विपर्य-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्यति, न जानामीति । ज्ञानजन्यां ज्ञाततां कल्पयित्वा तस्याः स्वप्रकाशत्वकल्पनापेक्षया ज्ञानस्यैव स्वप्रकाशत्वकल्पनं वरम् । ज्ञानस्य स्वप्रकाशत्वं निरस्य अनुमेयतासाधनं प्रयोजनवशात् । ज्ञानस्यानुमेयतायां तस्याप्रत्यक्षत्वे प्रत्यक्षत्वेन प्रतीतिः कस्याङ्गीकार्या ? न ज्ञानस्य, तस्यानुमेयत्वात् । पारिशेष्यात् बाह्यार्थस्यैवेति, बाह्यार्थसाधनेन योगाचारनिराकरणं प्रयोजनम् । भट्टकुमारिलेन श्लोकवार्तिके ईश्वरो निराकृतः । ईश्वरस्यानुमानमात्रेण सिद्धिनिराकरणाभिप्रायं तत् । कार्यबलेन कर्तुरनुमानेऽपि घटादेरिव किं एकः कर्ता जगतः आहोस्वित् प्रासादादेरिव नाना कर्तारः इति संशये, "द्यावापृथिवी जनयन् देव एकः"[20] इत्यादिश्रुतेरेव शरणतया नानुमानमेकेश्वरसाधनाय प्रभवतीति । तार्किका अपि ईश्वरगतसंख्यादीनां श्रुत्यैव साधनमभिप्रयन्ति । एवं योगाचारा अपि ज्ञानस्य स्थिरतां मन्वाना अपि दृढवैराग्यजननाय तस्याप्यनित्यतां साधयन्ति ।

(१७) बौद्धेषु माध्यमिकाः प्रधानतया परिगणिताः । तेषामयमाशयः—दुःखनिवृत्तिः प्रेप्सिता । तत्साधनं प्रज्ञा । सा द्विविधा—साधनं फलमिति, साधनमपि प्रज्ञा द्विविधा ; अधिमुक्तिचरितस्य, भूमिप्रविष्टस्य चेति । श्रुतिमयी चिन्तामयी, भावनामयी च क्रमश अभ्यस्यमाना भूमिप्रविष्टस्य प्रज्ञां जनयति सा उभयावरणनाशात् सकलकल्पनाजालविगतबुद्धत्वस्वभावां प्रज्ञां निर्वर्तयति सा दुःखं समूलमुन्मूलयति । दुःखं जन्मव्याधिजरामरणादिनिमित्तं प्रियविप्रयोगाप्रियसंप्रयोगादिनिमित्तं च आध्यात्मिकादिदुःखत्रयमिति यावत् । तस्य निवृत्तिरात्यन्तिकः समुच्छेदः । प्रज्ञया हेतुभूतया सर्वं स्वप्नमायास्वभावं पश्यतः सर्वपदार्थानां निःस्वभावताप्रतिपत्तिर्जायते । ततः परमार्थोऽधिगम्यते । तेन सवासनाशेषदोषसमुदयनिवृत्तौ सकलदुःखानामात्यान्तिकसमुच्छेदः मोक्षः ।

द्विविधं सत्यं संवृतिः परमार्थश्चेति । अविद्या हि अभूतमर्थं ज्ञापयति, भूतं चावृणोति । तयोपदर्शितं संवृतिरुच्यते । तदेव लोकसंवृतिसत्यमिति व्यपदिश्यते । लोकस्यैव संवृत्या सत्यमिति तत् तथा व्यपदिश्यते । सा च संवृतिः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लोकत एव द्विधा—सत्यसंवृतिः, मिथ्यासंवृतिरिति । घटादिकं दोषरहितैः चक्षुरादीन्द्रियैः गृह्यमाणं लोकत एव सत्यम् । ऐन्द्रजालिकप्रदर्शितं व्याघ्रादि, मरीच्युदकं, प्रतिबिम्बादि च, दोषवता चक्षुरादिनोपलब्धं, लोकत एव मिथ्यासंवृतिः । यथाहुः—

" विनोपघातेन यदिन्द्रियाणां
षण्णामपि ग्राह्यमवैति लोकः ।
सत्यं हि तल्लोकत एव शेषं
विकल्पितं लोकत एव मिथ्या " ॥[27]

इति । संवृतिसत्यद्वयमपि सम्यग्दृशामार्याणां मृषा । परमार्थदृशां संवृतिसत्यमलीकम् । अविद्यावतां परमार्थो न भासते ।

कः परमार्थः ? परम उत्तमोऽर्थः परमार्थः । अकृत्रिमं वस्तुस्वरूपम्, यदधिगत्य सवासनः क्लेशः प्रलीयते । शून्यता अतथता इत्यादयः पर्यायाः । परमार्थसत्यस्य लक्षणमेवमुक्तम् । सर्वव्यवहारसमतिक्रान्तं, निर्विशेषं, असमुत्पन्नं, अनिरोधं, अभिधेयाभिधानज्ञानज्ञेयविगतं, सर्वाकारवरोपेतसर्वज्ञज्ञानविषयभावसमतिक्रान्तं, परमार्थसत्यम् । तदविषयः सर्वविकल्पानां, यतः भावाभाव-स्वपरभाव-सत्यासत्य - शाश्वतोच्छेद - नित्यानित्य-सुखदुःख-शुच्यशुचि-शून्याशून्यात्मानात्मलक्ष्यलक्षणैकत्वानेकत्वोत्पादनिरोधादयो विशेषाः तस्य न संभवन्ति, अमीषां सांवृतधर्मत्वात् । तदेतदार्याणामेव स्वसंविदितस्वभावतया प्रत्यात्मवेद्यमिति, तन्न केनचित् प्रतिपादयितुं शक्यते । सर्वप्रकारविनिर्मुक्तं सर्वोपाधिरहितं कथं प्रतिपाद्येत ? शब्दा हि सविकल्पकज्ञानकारणानि । अविकल्पं वस्तु शब्दानां न विषयः । तथापि श्रोतृजनानुग्रहाय संवृत्या निदर्शनान्युपप्रदर्श्य, कथंचित् प्रतिपाद्यते । यथाहुः—

" अनक्षरस्य धर्मस्य श्रुतिः का ? देशना च का ? ।
श्रूयते देश्यते चापि समारोपादनक्षरः ॥ " [28]

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति । व्यवहारसत्य एव स्थित्वा परमार्थ उपदिश्यते । उपदेशाच्च परमार्थाधिगमः । यथाह नागार्जुनः—

"व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥"[29] इति ।

उपायभूतं व्यवहारसत्यम् । उपेयभूतं परमार्थसत्यं यदधिगमात् निर्वृतिः ।

(१९) किं निर्वाणम् ? सर्वेषां प्रपञ्चानां निमित्तानां य उपशमोऽप्रवृत्तिः तन्निर्वाणम् । प्रकृत्यैवोपशान्तत्वात् शिवः । वाचामप्रवृत्तेः प्रपञ्चोपशमः । चित्तस्याप्रवृत्तेः शिवः । क्लेशानामप्रवृत्त्या जन्मनोऽप्रवृत्त्या शिवः । ज्ञेयानुपलब्ध्या प्रपञ्चोपशमः, ज्ञानानुपलब्ध्या शिवः । तदुक्तम्—"सर्वोपलम्भोपशमः प्रपञ्चोपशमः शिवः"[30] इति ।

(२०) यदि परमार्थसत्यं शब्दप्रतिपाद्यं न भवति, तर्हि बुद्धः कथं तदुपदिष्टवान् ? अत्र नागार्जुनः एवं समादधौ—"न क्वचित् कस्यचित् कश्चिद्धर्मो बुद्धेन देशितः"[31] इति । अविद्यानिद्रानुगतानां देहिनां स्वमायमानानामिव स्वविकल्पाभ्युदय एषः । बुद्धेन न देशित इत्यस्य अयमप्यभिप्रायो वर्णयितुं शक्यते—यथा इक्षुक्षीरगुडादीनां माधुर्यभेदः विविच्य, इदमस्य माधुर्यमिदमस्य माधुर्यमिति सरस्वत्यात्याख्यातुमशक्यं, प्रत्यात्मवेद्यत्वात् तस्य ; तथा परमार्थोऽपि प्रत्यात्मवेदनीयः, न शब्दैः बोधयितुं शक्य इति न देशितः ।

(२१) माध्यमिकमतं संक्षेपेण प्रदर्शितम् । एषां प्रक्रिया बहुश औपनिषदानां प्रक्रियामनुकरोति । परमार्थस्य सत्यता तद्व्यतिरिक्तस्य मिथ्यात्वं, मिथ्याभूतस्यापि विधाद्वयं, यद्वेदान्तिनः व्यावहारिकसत्यं, प्रातिभासिकसत्यमिति व्यपदिशन्ति ; परमार्थे मिथ्यावस्तुनः समारोपः, परमार्थस्य प्रपञ्चोपशमता, शिवता, श्रवणमननिदिध्यासनावगम्यता, वाचां तत्राप्रवृत्तिरित्यादिकं बहु उभयोः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

मते समम्। शब्दभेदमात्रं, न वस्तु भिनत्ति। बुद्धेन परमार्थस्यादेशनमपि[32] —'स होवाच अधीहि भगवो ब्रह्मेति। स तूष्णीं बभूव। तं ह द्वितीये तृतीये वावचन उवाच। ब्रूमः खलु, त्वं तु न विजानासि। उपशान्तोऽयमात्मेति', "यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"[33] इति श्रुत्यर्थानुकारि। निर्वाणार्थं देशनाभावात्, निर्वाणास्तित्वं दूरापास्तमित्येतदपि—

"न निरोधो न चोत्पत्तिः न बद्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥"[34]

इति वदद्भिः वेदान्तिभिः संमतम्।

(२२) तर्हि को भेदः माध्यमिकौपनिषदयोः? औपनिषदा वेदप्रामाण्यमङ्गीकृत्य, तद्दर्शितेन पथा तत्त्वं निर्णयन्ति। माध्यमिकास्तु त्रिपिटकादिप्रदर्शितेन मार्गेण विमृशन्ति तत्त्वम्। औपनिषदाः सच्चिदानन्दस्वरूपं नित्यं जीवात्मानमभ्युपेत्य, तस्य सच्चिदानन्दरूपेण ब्रह्मणा ऐक्यं साधयन्ति तत्त्वमसीत्यादिमहावाक्यैः। माध्यमिकास्तु—

"आत्मा तीर्थ्यैः कल्प्यते नित्यरूपो
कर्ता भोक्ता निर्गुणो निष्क्रियश्च।
कंचित्कंचिद्भेदमाश्रित्य तस्य
भेदं याता प्रक्रिया तीर्थिकानाम्॥
सत्कायदृष्टिप्रभवानशेषान्
क्लेशांश्च दोषांश्च धिया विपश्यन्।
आत्मानमस्याविषयं च बुद्ध्वा
योगी करोत्यात्मनिषेधमेव॥"[35]

इति वदन्त आत्मानं निषेधन्ति। शान्तरक्षितश्च तत्त्वसंग्रहे[36]—

"एतच्च सुगतस्येष्टमादौ नैरात्म्यकीर्तनात्।
सर्वतीर्थकृतां तस्मात् स्थितो मूर्ध्नि तथागतः"॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति । [37]" सत्यं ज्ञानमनन्तं ब्रह्म, [38]विज्ञानमानन्दं ब्रह्म " इति विधिमुखेन, तथा [39]" नेति नेति ", [40]" अस्थूलमनणु " इत्यादिनिषेधमुखेनापि तत्त्वमुपदिशन्ति वेदान्ताः । निषेधमुखेनैव तत्त्वमुपदेष्टव्यमिनि माध्यमिकाः । यत्परमार्थसत्यं तत्त्वं तत्सत्त्वचित्त्वानन्दत्वोपलक्षितमिति वेदान्तिनः । सर्वोपप्लवरहितत्वोपलक्षितमिति माध्यमिकाः । व्यवहारे पुनः महीयान् भेद इति व्यक्तम् । वार्तिककृतः सुरेश्वराचार्यास्तु[41] —

" अनित्यदुःखशून्यत्वं पदार्थानां ब्रुवन् स्फुटम् ।
बुद्धोऽपि रागाद्युच्छित्तौ यतते नात्मनिह्नुतौ ॥"

इति बुद्धस्यात्माङ्गीकारं कथितवन्तः । अत्रानन्दगिरिणा[42] —

" नैरात्म्यमार्गमधिगम्य भवन्ति मुक्ताः
तस्मादसावतिशयेन विचार्यतेऽत्र ॥"

इत्युक्तत्वात् कथमात्मज्ञानार्थता वैनाशिकदर्शनस्येति इमां कारिकामवतार्य, पदार्थानामनित्यत्वाद्युक्त्या तद्वैराग्यद्वारा प्रत्यज्ञाने वैनाशिकदर्शनं पर्यवसितम् । यथाह[43] — 'सर्वज्ञवचनार्थो नाम क्षणिकनैरात्म्यादिचतुरार्यसत्यतत्त्वपरिज्ञानेन सकलसंसारदुःखनिवृत्त्याख्यः परमपुरुषार्थ इति' इति व्याख्यातम् । सुरेश्वराद्युपवर्णितरीत्या वैनाशिकदर्शनस्याद्वैतपर्यवसितता स्पष्टा । माध्यमिकदृष्ट्यापि अद्वितीयवस्तुपर्यवसानं निरूपितम् ।

(२१) सर्वेषां शास्त्राणां प्रत्यक्चैतन्यज्ञानार्थतां वर्णयद्भिः सुरेश्वराचार्यैः —

" अपि वात्स्यायनादीनां शास्त्राणामुक्तहेतुतः ।
प्रामाण्यमविरुद्धं स्यादैकात्म्यज्ञानजन्मने " ॥[44]

इति वात्स्यायनीयकामसूत्राणामपि प्रामाण्यम् आत्मज्ञानपर्यवसायितयैवेत्युक्तम् । अज्ञातज्ञापकं हि प्रमाणम् । आत्मैवाज्ञातः । अतः प्रामाण्यसिद्धये आत्मज्ञानपर्यवसानं वक्तव्यमित्यभिप्रायः । कामसूत्रकृतापि —

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

" धर्ममर्थं च कामं च प्रत्ययं लोकमेव च ।
पश्यन्नेतस्य तत्त्वज्ञो न च रागात् प्रवर्तते ॥[45]
एवमर्थं च कामं च धर्मं चाप्याचरन्नरः ।
इहामुत्र च निःशल्यमत्यन्तं सुखमश्नुते ॥[46]
तदेतत्कुशलो विद्वान् धर्मार्थावबलोकयन् ।
नातिरागात्मकः कामी प्रयुञ्जानः प्रसिद्ध्यति ॥ "[47]

इति वदता रागनिवृत्तिद्वारा तत्त्वज्ञानपर्यवसानं स्पष्टीकृतम् । यत्तु—कन्या-संप्रयुक्तकादिकमुक्तं, तदपि वैराग्यार्थमेवेति तेनैव—

" अधिकारवशादुक्ता ये चात्राचारवर्जिताः ।
तदनन्तरमत्रैव ते प्रयत्नान्निवारिताः ॥ "[47]

इति निरूपितम् । एवं संग्रहेण निरूपितानां दर्शनानां प्राणमय-मनोमय-कोशातिरिक्तात्मावगतिरपि अवान्तरं प्रयोजनम् । अवैदिकानां दर्शनानां प्रसङ्गतः कामशास्त्रस्यापि अद्वैते तात्पर्यं संग्रहेण प्रतिपादितम् । वैदिकानां दर्शनानां तदुत्तरत्र संग्रहेण प्रतिपादयिष्यते ।

(२२) चार्वाकाः, जैनाश्च परमार्थसत्यं दृश्यकल्पनाधिष्ठानं स्फुटं न प्रतिपादयन्तीति तेषां निरासो भगवतः पाराशर्यस्य, तत्सूत्रभाष्यकर्तृणां च युज्यते । परमार्थतत्त्वमभ्युपेत्य, तस्मिन्नितरस्य सर्वस्याप्यारोपितत्वं स्पष्टं निरूपयतां माध्यमिकानां निरासः कथं संगच्छताम् ? अद्वैतमेव प्रकारान्तरेण ते निरूपयन्ति इत्याक्षेपः पुरस्फूर्तिकः ।

तस्येदं समाधानम्—माध्यमिका वेदप्रामाण्यं नाङ्गीकुर्वन्ति । केवलया युक्त्या परमार्थसत्यमधिष्ठानं निर्विकल्पं कल्पयन्ति । कल्पनेयं कल्पनाभासः । दृष्टानुरोधिनी कल्प्यमाना हि अदृष्टकल्पना । कल्प्यमानं सविकल्पमेव भवेत् । न हि निर्विकल्पं क्वापि दृष्टपूर्वम् । प्रत्यक्षादिप्रमाणैः अवगम्यमानस्य द्वैतस्य मिथ्यात्वं नान्यत्

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्थिरं तत्त्वमनभ्युपगम्य निर्वोढुं शक्यम्। तथा सति प्रत्यक्षादिप्रमाण-सिद्धस्यैव परमार्थत्वात्। सर्वदृश्यनिषेधाधिकरणस्य सिद्धिः श्रुत्यैव प्रमाणभूतया। अत एव "जन्मादिसूत्रं ब्रह्मणि नानुमानप्रमाणोपन्यासार्थं, वेदान्तवाक्य-कुसुमग्रथनार्थत्वात् सूत्राणाम्। किंतु— 'यतो वा इमानि भूतानि जायन्ते' इत्यादिवाक्यार्थनिर्णयार्थं" मित्युपपादितं भाष्यकृता। [48]"शास्त्रयोनित्वात्" इति वदन् सूत्रकारः शास्त्रमेव ऋग्वेदाद्यात्मकं ब्रह्मणि प्रमाणमाह। शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यते इत्यभिप्रायं भाष्यकृदाचख्यौ। "तर्काप्रतिष्ठानादन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसङ्गः"[49] इति सूत्रे—

"अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत्।
यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः।
अभियुक्ततरैरन्यैरन्यथैवोपपाद्यते॥"

इति प्रमाणोपन्यासपुरःसरं ब्रह्मणः युक्त्यगम्यतां समर्थयामास। रूपाद्यभावाद्धि, नायमर्थः प्रत्यक्षगोचरः। लिंगाद्यभावाच्च, नानुमानादीनामिति तत्र तत्र ब्रह्मण अनुमानागम्यतां प्रत्यपादयत्। एवं च वेदप्रामाण्यानभ्युपगमे सकलदृश्याधिष्ठानस्य दृश्यनिषेधावधेः सत्त्वे प्रमाणाभावात्, प्रत्यक्षादिप्रमाण-सिद्धस्य द्वैतस्यैव परमार्थतया न कथमपि माध्यमिकसंमतयोः संवृतिसत्य-परमार्थसत्ययोः सिद्धिरिति माध्यमिकमतं दूषितम्। न च सर्वज्ञबुद्धवचनात् परमार्थावगमः। तस्य पौरुषेयतया भ्रमादिमत्पुरुषप्रणीतत्वशङ्कया संभवद-प्रामाण्यज्ञानकवलितत्वेनाप्रामाण्यज्ञानासंस्पृष्टनिश्चयजननासमर्थत्वात्। वेदस्य तु कर्तुरस्मरणादिना सिद्धापौरुषेयत्वस्य अप्रामाण्यसंशयादिशून्यनिश्चितप्रामाण्यक-ज्ञानजनकत्वेन सर्वदृश्याधिष्ठानस्य सर्वदृश्यनिषेधावधेः निर्विकल्पस्य ब्रह्मणः तथा सर्वप्रपञ्चमिथ्यात्वस्य श्रुतितः सिद्धेः वेदप्रामाण्यवादिनां सच्चिदानन्दानन्ता-त्मब्रह्मरूपाद्वैतसिद्धिः निष्प्रत्यूहा॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Lecture II

ओं नमः सदसे। मान्याः सभासदः ! चार्वाकादिनास्तिकदर्शनानां परंपरया अद्वैतपर्यवसायितां प्रत्यपादयम्। संप्रति सांख्यपातञ्जलाद्यास्तिकदर्शनानां तत्पर्यवसानं निरूपयामि।

सांख्यसप्ततिकृता ईश्वरकृष्णेन—

"दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ।
दृष्टे सापार्था चेत् नैकान्तात्यन्ततोऽभावात्॥
दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात्॥"[1]

इत्युक्तम्। आध्यात्मिकाधिदैविकाधिभौतिकतापत्रयतप्तानां तन्निवर्तके साधने जिज्ञासा समुत्पद्यते। दृष्टं साधनं तापत्रयं निवर्तयत्येवेति न वक्तुं शक्यम्। अनुष्ठितेऽपि दृष्टे साधने, निवृत्तेः कदाचिददर्शनात्; निवृत्तस्यापि पुनः कदाचिदुत्पत्तिदर्शनात्, नात्यन्तिक ऐकान्तिको वा दुःखापघातः दृष्टादुपायात्। वैदिकोऽपि ज्योतिष्टोमादिरुपायः प्रमाणमूर्धन्येन वेदेन प्रतिपादितः ऐकान्तिकफलसाधनमपि दुःखसंभिन्नं सातिशयं क्षयिष्णु फलं जनयतीति व्यक्ताव्यक्तपुरुषान् विवेकतो विज्ञाय शास्त्रयुक्तिभिर्व्यवस्थाप्य, तदनन्तरमुत्पन्नात् साक्षात्कारात् ऐकान्तिकी च दुःखनिवृत्तिः जायते। सैव मोक्ष इति सांख्या अभिप्रयन्ति। सांख्याः सत्कार्यवादिनः। कार्यस्योत्पत्तेः पूर्वं प्रागभावं, नाशकसामग्रीसमवधाने तत्प्रध्वंसं च नाङ्गीकुर्वन्ति। कार्यस्योत्पत्तेः पूर्वं तस्य सूक्ष्मावस्था उपादानकारणेऽस्ति। कारकव्यापारेण अभिव्यज्यते। अभिव्यक्तिरेवोत्पत्तिः। नासतः कारणे कार्यस्योत्पादः। नाशकसामग्री यदा संनिधत्ते तदोपादाने सूक्ष्मावस्थात्मना अवतिष्ठते। अतीतावस्थं कार्यं नष्टं शान्तं इति व्यपदेशं भजते। अतो दुःखत्रयाभिघात इति दुःखानामतीतावस्था आत्यन्तिकी निगद्यते। तथाच प्रकृतिपुरुषविवेकज्ञानात् जायमाना दुःखानामात्यन्तकी अतीतावस्था, यदनन्तरं कथंचिदपि दुःखस्य न पुनरुन्मज्जनं भवति; सा मोक्ष इति सांख्या वर्णयन्ति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जन्मनो, मरणस्य, बुद्ध्यादीनां करणानां व्यवस्था अनुभूयते । यदि सर्वेषु शरीरेषु एक एव पुरुषः अधिष्ठाता स्यात् तदा एकस्य जन्मनि सर्वे जायेरन् । एकस्य मृतौ, सर्वे म्रियेरन् । एकस्य बाधिर्ये, नान्ये शब्दं श्रुणुयुः । न चैवं दृश्यते । एकस्मिन् प्रयतमाने, चलत्येकस्मिन् शरीरे सर्वाणि शरीराणि युगपत् चलेयुः । केषाञ्चित् सात्विकता, केषाञ्चित् राजसता, केषाञ्चित् तामसतापि व्यवस्थया अनुभूयमाना सर्वशरीरेषु पुरुषैकत्वे न संगच्छते । अतः शरीरभेदेन भिन्नाः पुरुषा इति पुरुषाणां बहुत्वं सिद्ध्यति । पुरुषः चैतन्यस्वरूपः न नैयायिकादीनामिव चैतन्याश्रयः । सर्वदा दुःखत्रयस्यात्यन्तिकाभाववांश्चेति मन्यन्ते ।

तर्हि कथं दुःखोपलंभः ? प्रकृतिपुरुषयोः जडचैतन्यरूपयोरत्यन्तं भेदेऽपि भेदमगृहीत्वा प्रकृतिगतौ बन्धमोक्षौ स्वगतौ जानाति पुरुषः । यथा भृत्यगतौ जयपराजयौ राज्ञि उपचर्येते, तथा प्रकृतिगतौ बन्धमोक्षौ पुरुषे उपचर्येते । प्रकृतिपुरुषयोः विवेकख्यात्या दीर्घं कालं सादरं निरन्तरं सेवितया तयोः अन्यताख्यातिरूपः साक्षात्कार उत्पद्यते । ततः संसारमूलस्य प्रकृतिपुरुषयोः अविवेकस्य नाशान्मुक्तो भवति । यद्यपि भ्रमतद्वासनापरंपरा अनादिः । तथापि दृढेन विवेकसाक्षात्कारेणादिमतापि तस्याः संभवी विनाशः । तत्त्वसाक्षात्कारः, ' नास्मि, न मे, नाहम् ' इत्येवंरूपः । संकल्पाध्यवसायादय आन्तरा वचनादानादयो बाह्याश्च सर्वे व्यापारा आत्मनि " नास्मि " इति निरस्यन्ते । क्रियासु कर्तृतां 'नाह' मिति दूरीकरोति । ' अहं जानामि ', ' अहं यजे ', इत्याद्यनुभवेषु कर्तृत्वं भासत इत्यहमः कर्तृपरता गम्यते । क्रियासामान्यप्रतिषेधवशात् कर्तृत्वसामान्याभावो विवक्षितः । न प्रकृतिः परिणामस्वभावा प्रसवित्र्यस्मि, किं तु पुरुषोऽपरिणामी, अतश्चाकर्ता, कर्तृत्वसामान्याभावादेव स्वामितापि न किंचित् प्रत्यपि मेऽस्तीति साक्षात्कारे न किंचिदवशिष्यते ज्ञातव्यम् । ईदृशे विवेकसाक्षात्कारे दृढे प्रकृतिकार्ययोः भोगविवेकसाक्षात्कारयोः संपन्नत्वेन प्रसोतव्यं न

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

किंचिदवशिष्यत इति प्रकृतिर्निवर्तते । पुरुषोऽपि स्वयं निष्क्रियः प्रकृत्या असंभिन्नश्च भवति । सांख्यानां सिद्धान्ते यद्यपि प्रकृतिर्नित्या पुरुषोऽप्यविनाशीति तयोः संयोगे नित्यता दुर्वारेति संसृतिरपरिहार्येति भाति । तथापि नायं संयोगः नैयायिकानामिव कश्चिद्गुणः, येनैवमाशङ्क्येत । किंतु योग्यतारूपः । योग्यता पुरुषस्य चैतन्यरूपता, प्रकृतेर्जडता विषयता च । तयोर्नित्यत्वेऽपि यया प्रकृत्या विवेकख्यातिर्नोत्पादिता, सा शब्दाद्युपभोगं जनयतु, शब्दाद्युपभोगबीजस्याविवेकख्यातेः जागरूकत्वात् । विवेकख्यात्या बीजनाशे शब्दाद्युपभोगस्य न प्रसक्तिः । विवेकख्यातिरपि प्रकृतेः परिणाम एव । तामप्यविवेकादेव, 'ममेयं', 'मदर्थेयम्' इति मनुते । विवेकख्यात्या अविवेकख्यातिनाशे पुरुषः विवेकख्यात्यापि असंसृष्टो भवति । तत्त्वसाक्षात्कारबलादेव अनेकेषु पूर्वजन्मसु संचितानि प्राग्विवेकख्यातेः अस्मिन् जन्मनि संपादितानि च पुण्यानि पापानि च भ्रष्टबीजानीवांकुरं न जात्यायुर्भोगलक्षणं फलं प्रसुवते । कुलालव्यापारनिवृत्तावपि यथा वेगवशात् कुलालचक्रं कंचित्कालं भ्रमदवतिष्ठते, तथा विवेकख्यात्युदयानन्तरमपि प्रारब्धबलात् कंचित्कालं उत्पन्नविवेकख्यातेरपि शरीरं तिष्ठति ; "तस्य तावदेव चिरं यावन्न विमोक्ष्ये, अथ संपत्स्ये" इति श्रुतेः । प्रारब्धाधीनभोगसमाप्तौ शरीरमपि नश्यति । तं प्रति कृतभोगापवर्गा प्रकृतिः निवर्तते । ततो दुःखेभ्य अत्यन्तं विमुक्तः पुरुषः केवलीभवति ।

इयं सांख्यानां प्रक्रिया । अस्मिन् मते पुरुषस्य चैतन्यरूपताभ्युपगमेन सिद्धैव स्वप्रकाशता । यदि परप्रकाश्यः स्यात्, विषयतया जड एव स्यात् । सद्रूपश्च, असतः शशविषाणादेरिव साक्षित्वानुपपत्तेः । नित्यत्वेन विभुत्वेन कालपरिच्छेदेन देशपरिच्छेदेन च रहितः । प्रकृतेः नानाचैतन्यानां चाङ्गीकारेण स्वसमानसत्ताकद्वितीयवस्तुसाहित्यरूपः अद्वैतमतरीत्या वस्तुपरिच्छेदः प्रसज्यते । तथापीदं सांख्याभिमतम् । "मानाधीना मेयसिद्धिः" इति सर्वतान्त्रिकसंमतम् । कैवल्यदशायां प्रकृतेः तं प्रत्युपरततया कायकरणराहित्येन च स्वव्यतिरिक्तं नैव

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जानाति । यदि जानीयात् मुक्तसंसारिणोरविशेषप्रसंगः । द्वितीयस्योपलम्भाभावे द्वितीयं नास्तीति द्वितीयस्य दृष्टनष्टस्वरूपतया मिथ्यात्वमेव । अतश्च स्वसमान-सत्ताकद्वितीयराहित्यरूपो वस्त्वपरिच्छेदोऽपि सुसंपादः । आनन्दरूपता योगदर्शन-तात्पर्यनिरूपणावसरे प्रदर्शयिष्यते । एवं सांख्यानां सच्चिदानन्दानंतरूपता पुरुषस्य पर्यवसानगत्या लभ्येति तेषाम् अद्वैते तात्पर्यम् । स्पष्टमनुक्तिस्तु ऐकात्म्येऽपि सुखदुःखादिवैषम्यस्योपाधिनिबन्धनतायां चित्तस्थैर्यमनाप्नुवानान् मन्दाधिकारिणः बोधयितुं नानात्मवादाश्रयणात् । सर्वेषां दर्शनानां अद्वितीयात्मस्वरूपनिरूपण-परत्वेऽपि, यथाधिकारमेव प्रक्रियानिरूपणपरता, अधिकारभेदेन प्रक्रियाभेदात् ।

पातञ्जला अपि सांख्यप्रक्रियासमानामेव प्रक्रियां निरूपयन्ति । अत एव सांख्यपातञ्जलदर्शनयोः समानतन्त्रत्वव्यवहारः दार्शनिकानाम् । क्लेशकर्म-विपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः पातञ्जलानामभिमतः । सांख्याः तं नाङ्गीकुर्वन्ति । एतदेव कापिलानां निरीश्वरसांख्या इति व्यपदेशे कारणम् । ईश्वरप्रणिधानादिकं नाङ्गीकृतं सांख्यैः । योगिनः पुरुषस्वरूपम् ; " द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः "[3] इत्याहुः । सूत्रस्यायमर्थः । प्रकृतिः तद्विकाराश्च दृश्याः, तेषां द्रष्टा पुरुषः । स चैतन्यमात्रस्वरूपः । मात्रपदेन केनापि धर्मेणासंपृक्तता बोध्यते । स बुद्धौ दर्पणस्थानीयायां प्रतिबिम्बते । दृक्प्रति-बिम्बयुतया बुद्धया शब्दादयो विषया गृह्यन्ते । बुद्धिः परिणामिनी, अपरिणामी पुरुषः । बुद्धिः परार्था, पुरुषस्य भोगापवर्गौ संपादयन्ती उपकरोति । पुरुषो न परार्थः । न कस्मैचित् । त्रिगुणा बुद्धिः, पुरुषो निर्गुणः । यथा निर्मले दर्पणे संक्रान्तप्रतिबिम्बं मुखं स्वयमसंक्रान्तमपि संक्रान्तमिव, एवं बुद्धिप्रति-बिम्बिततया बुद्धौ असंक्रान्तापि चित् संक्रान्तेव बुद्धिवृत्तिमनुपश्यति । पुरुषः स्वामी । दृश्यं स्वम् । तस्य दर्शनार्थः पुरुषस्य संयोगः । तेन दृश्यस्योपलब्धिः भोगः । द्रष्टुः स्वरूपोपलब्धिः अपवर्गकारणम् । बुद्ध्यादिभ्यो विविक्तस्यात्मनः स्वरूपावस्थानं मोक्षः । विपर्ययवासनारूपा अविद्या । तया बुद्ध्या चैतन्यस्य

CC-O. In Public Domain. Digitized by eGangotri

पुरुषस्य संयोगो दुःखकारणम्। सत्वपुरुषान्यताख्यातिरूपया विवेकख्यात्या दुःखकारणनिवृत्तौ दुःखनिवृत्त्या पुरुषः स्वरूपे प्रतितिष्ठते। श्रवणजेन परोक्षज्ञानेन बुद्धिपुरुषयोः विवेकं गृह्णाति। ततो मननेन तत्र संभवतः संशयान् परिहरति। ततः दीर्घकालं निरन्तरं सादरं सेवितया भावनया अत्यन्तं दृढया साक्षात्काररूपा विवेकख्यातिरुदेति। तया सवासनं मिथ्याज्ञानं निवर्तते। पुनश्चानुत्पत्तिः तस्येति, पुरुषः हेयदुःखस्य सकारणस्य नाशान्मुक्त इत्युच्यते। प्रकृतेरेकत्वेऽपि पुरुषभेदेन बुद्ध्यादयो भिद्यन्ते। प्रलये वासनाः प्रधानगता भवन्ति। सृष्टिकाले तत्तत्पुरुष-संयोगिनीमेव बुद्धिं तत्तद्वासनावासितां प्रकृतिः प्रसौति। अतः प्रलये चित्तनिवृत्तावपि सा सवासना। सवासनस्य चित्तस्य निवृत्तिः विवेकख्यातेरेव, नान्यथेति चित्तनिवृत्तिमत्पुरुषस्वरूपावस्थानं मोक्षः इति योगिनो वदन्ति।

'"कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसधारणत्वात्" इति योगसूत्रम्। उत्पन्नविवेकख्यातिं पुरुषं प्रति मोक्षदशायां नष्टमपि अनुत्पन्नविवेकख्यातिं पुरुषं प्रत्यनष्टं दृश्यम्। अन्यसाधारणत्वात् तस्य।

अयमाशयः—"णश" धातुः अदर्शनार्थकः। यस्य विवेकख्यातिः उत्पन्ना, दृश्यं तस्य गोचरो न भवति। किं कारणम्? तद्दृश्ये हेतोः अदर्शनस्य तदीयविवेकख्यात्या निवृत्तौ कारणनिवृत्त्या तद्दृश्यमपि निवर्तते। प्रकृतेः एकत्वेऽपि महदादेः प्रतिपुरुषं भेदः योगिसंमतः। बन्धकं च तदीयमहदादिदृश्यम्। तथा च मोक्षदशायां द्वितीयस्य भानाभावेन भानाधीनसत्ताकद्वैताभावेनाद्वितीयता सिद्ध्येव। दृग्दृश्यसंयोगस्य नित्यत्वं नानुपपन्नं, यतः अनुत्पन्नविवेकख्यातेः पुरुषान्तरस्य महदादिदृश्यसंबंधसद्भाव इष्टः। तदुक्तं तत्त्ववैशारद्यां वाचस्पतिमिश्रैः—"यद्यप्येकस्य महतः संयोगोऽतीततामापन्नः, तथापि महदन्तरस्य पुरुषान्तरेण संयोगो नातीत इति नित्य उक्तः" इति।

नित्यचैतन्यरूपस्य पुरुषस्यानन्दरूपतापि योगिसंमता। तथाहि—पातञ्जल-योगसूत्रेषु विभूतिपादे "संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम्" इति सूत्रे" अत्रेद-

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

माख्यानं श्रूयते—भगवतो जैगीषव्यस्य संस्कारसाक्षात्करणाद् दशसु महासर्गेषु जन्मपरिणामक्रममनुपश्यतो विवेकजं ज्ञानं प्रादुरभूत् । अथ भगवानावट्यस्तनुधरस्तमुवाच । दशसु महासर्गेषु भव्यत्वाद् अनभिभूतबुद्धिसत्त्वेन त्वया नरकतिर्यग्गर्भसंभवं दुःखं संपश्यता देवमनुष्येषु पुनःपुनरुत्पद्यमानेन सुखदुःखयोः किमधिकमुपलब्धमिति । भगवन्तमावट्यं जैगीषव्य उवाच । दशसु महासर्गेषु भव्यत्वादनभिभूतबुद्धिसत्त्वेन मया नरकतिर्यग्गर्भसंभवं दुःखं संपश्यता देवमनुष्येषु पुनः पुनः उत्पद्यमानेन यत्किंचिदनुभूतं तत्सर्वं दुःखमेव प्रत्यवैमि । भगवानावट्य उवाच—यदिदमायुष्मतः, प्रधानवशित्वमनुत्तमं च सन्तोषसुखं किमिदमपि दुःखपक्षे निक्षिप्तमिति । भगवान् जैगीषव्य उवाच—विषयसुखापेक्षयैवेदमनुत्तमं सन्तोषसुखमुक्तम् । कैवल्यसुखापेक्षया दुःखमेव " इति स्पष्टमभ्यधायि । कैवल्यं स्वरूपप्रतिष्ठारूपम् । निर्धर्मकं चैतन्यं स्वरूपं पुरुषस्य । अतः कैवल्यसुखं धर्मो न भवितुमर्हति । अतः सुखरूपतयैवेदं भाष्यं सूपपादम् । समानतन्त्रत्वात् सांख्यमतेऽपीदं समानम् । अतो मन्यामहे सांख्ययोगयोः सच्चिदानंदस्वरूपः पुरुष इति ।

कृतार्थं प्रति नष्टमित्यादिसूत्रेण कृतार्थस्य दर्शनेन तदीयादर्शननिवृत्तिद्वारं तदीयानां महदादीनां निवृत्तिरुक्ता । नाशश्चादर्शनमित्यवोचम् । दृष्टनष्टस्वरूपतोक्त्या महदादीनां मिथ्यात्वमुक्तप्रायम् । दृष्टनष्टस्वरूपत्वं मिथ्यात्वम् । शुक्तिरजतादिवत् दृश्यत्वेनापि मिथ्यात्वम् । दर्शनमात्रनिवर्त्यतयापि मिथ्यात्वम् । लोकप्रसिद्धोऽयं विभागः । कर्मनाश्यो भावः घटादिः सत्यत्वेनेष्टः । दण्डपातादिनाश्यो घटादिः, न ज्ञानमात्रनाश्यः । यस्तु ज्ञानैकनाश्यो गन्धर्वनगरशुक्तिरजतादिः भावः, स मिथ्येति प्रसिद्धिः । विवेकख्यात्या साक्षात्कारेण दृष्टस्य संयोगस्य तत्कार्याणां महदादीनां नाशोक्त्या ज्ञानमात्रनिवर्त्यत्वेन शुक्तिरजतगन्धर्वनगरादेरिव मिथ्यात्वं व्यञ्जितम् । किं च " कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् " इति सूत्रेण प्रकृति तत्कार्यरूपं जगत् मुक्तेन न दृश्यते,

CC-O. In Public Domain. Digitized by eGangotri

बद्धैरन्यैर्दृश्यते इति हेतूक्त्या, यथा शुक्तिरजतादयः दोषवता पुरुषेण दृश्यमानाः, तदन्येनादृश्यमानाः मिथ्या, तद्वत्प्रकृतितत्कार्याणां कैश्चिद् दृश्यमानानां अन्यैरनवगम्यमानानां मिथ्यात्वं समर्थितम् । सत्याश्चेत् घटादय इव सर्वैरेव दृश्येरन् । अतो मन्यामहे प्रकृति-प्राकृतानां मिथ्यात्वं सांख्ययोगिनोरभिमतमिति । अतो निरङ्कुशमद्वैतं तयोस्तात्पर्यविषयः ।

संप्रति नैयायिकानामाशयं परिशीलयामि । ते हि तत्त्वज्ञानान्निःश्रेयसाधिगम इत्यभिप्रयन्ति । यद्यपि तत्त्वज्ञानं निःश्रेयसं च विद्याभेदेन भिद्यते । त्रय्यां दर्शपूर्णमासादिसाधनानां परिज्ञानं तत्त्वज्ञानं, स्वर्गप्राप्तिः निःश्रेयसम् । नैयायिकानामात्मतत्त्वज्ञानां तत्त्वज्ञानात् निःश्रेयसमपवर्गप्राप्तिः । अपवर्गः [7]" तदत्यन्तविमोक्षोऽपवर्गः " इति सूत्रितः । तत्पदमत्रत्यं [8]" बाधनालक्षणं दुःखम " इत्यव्यवहितपूर्वसूत्रसूत्रितं दुःखं दुःखतत्साधनरूपं परामृशति । दुःखजन्मादिभिरत्यन्तं विमुक्तिरपवर्गः । दुःखविमुक्तिः प्रलयेऽप्यस्ति । सा नापवर्गः, सृष्टौ पुनः जन्मप्राप्तौ दुःखसंभवात् । अत आत्यन्तिकी दुःखविमुक्तिरपवर्ग इत्युक्तम् । उपात्तस्य जन्मनो हानिः, अन्यस्यानुपादानं चात्यन्ता । बुद्धि-सुख-दुःखेच्छाद्वेष-प्रयत्न-धर्माधर्मसंस्काराणां नवानामात्मगुणानामात्यन्तिकः समुच्छेदः, षण्णामिन्द्रियाणां, षण्णां विषयाणां, षण्णां बुद्धीनां, सुखदुःखयोः शरीरस्य च मेलनैकविंशतिसंख्याकानां दुःखानां विध्वस्तिर्वा मुक्तिरिति निर्णयः । तत्त्वज्ञानान्निःश्रेयसाधिगम एवं सूत्रितः— [9]" दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः " इत्याक्षपादीयं सूत्रम् । तत्त्वज्ञानान्मिथ्याज्ञानापायः । मिथ्याज्ञानं बहुविधम्—आत्मनि नास्तीति, अनात्मनि शरीरादावात्मेति, दुःखे सुखमिति, अनित्ये नित्यमिति, नास्ति कर्म नास्ति च कर्मफलमिति नास्ति निमित्तं जन्मनि, अनिमित्तो जन्मोपरमः, इत्येवमादयो विधा मिथ्याज्ञानस्य । तत्त्वज्ञानात्तस्यापगमः । मिथ्याज्ञानापगमे रागद्वेषयोरपायः । दोषरूपरागद्वेषयोरपाये, तन्निमित्तयोः धर्माधर्मयोः प्रवृत्तिशब्दितयोरपगमः । धर्माधर्मयोरपाये, तन्निमित्तस्य

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

जन्मनोऽपायः। जन्मापाये दुःखापायः, शरीरसंबंधनिमित्तत्वाद् दुःखस्य । तदुक्तम् [10]" न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः " इति । तत्त्वज्ञानमपि—आत्मनि अस्तीति अनात्मन्यनात्मेति पूर्वोक्तमिथ्याज्ञानविरोधि बहुप्रकारम् । यथावस्थितपदार्थावगतिः तत्त्वज्ञानम् । आत्मा शरीरेन्द्रियाद्यतिरिक्तः नित्यः । सुखं दुःखं वा नास्य स्वभावः किं तु आगमापायीत्यादिरीत्या यथावस्थितपदार्थावगतौ पूर्वोक्तानि मिथ्याज्ञानानि निवर्तन्ते । आगमात्प्रथमं प्रमेयमधिगच्छति । ततः शास्त्रीयेण न्यायविज्ञानेन संशयान् निरस्यति। ततः तत्त्वं भावयति । एवं भावयतः आत्ममनःसंनिकर्षाद् योगजधर्मसहकृतादुत्पद्यते तत्त्वविषयः दृढः साक्षात्कारः । आगमानुमानप्रत्यक्षाणां त्रयाणां प्रमाणानां संप्लवोऽस्तीति दृढमूलं तत्त्वज्ञानं सवासनं मिथ्याज्ञानं निहन्ति । तद्भावौ सूत्रोक्तप्रणाल्या दुःखस्यात्यन्तिकोपरमः संभवतीति नैयायिका आशेरते ।

मोक्षदशायामात्मनः सद्रूपस्य स्वव्यतिरिक्तविषयानवभास एष्टव्यः, अवभासकारणानां शरीरेंद्रियादीनामभावात् । मानाधीनत्वान्मेयसिद्धेः, मानाभावे मुक्तदृष्ट्या द्वितीयास्तित्वे प्रमाणाभावात् , द्वितीयराहित्यमद्वैतं सिद्ध्यति । तदा दुःखाभावमिव सुखमपीच्छन्ति । तदुक्तं न्यायभाष्यकृता [11]" यद्येवं मुक्तस्य नित्यं सुखं भवति अथापि न भवति, नास्योभयोरपि पक्षयोर्मोक्षाधिगमो विकल्पयते " इति । टीकाकृता वाचस्पतिमिश्रेण विवृतमिदम्—[12]" एवं वैराग्येण मोक्षमाणस्य प्रवृत्तौ सत्यां मुक्तस्य यदि नित्यं सुखं भवति, भवतु, मा वा भूत् । उभयोरपि पक्षयोर्मोक्षाधिगमो न विकल्प्यते, न संदिग्धो भवतीत्यर्थः" इति। यथाश्रुति नित्यस्य-सुखस्य पुरुषार्थत्व एव न्यायभाष्यकृतः तात्पर्यमवगन्तुं युक्तम् । अज्ञायमानस्य सुखस्य पुरुषार्थत्वाभावात् , मोक्षदशायां शरीरादिरूपज्ञानजनकाभावेन स्वरूपज्ञानेनैव प्रकाशस्य वक्तव्यतया नित्यचैतन्यरूपतापि सिद्ध्यति । मोक्ष आनन्दसंवित् नैयायिकैरङ्गीकृता इति, [13]" चरणाक्षपक्षे सानन्दसंवित्सहिता विमुक्तिः " इति वदद्भिर्माधवाचार्यैरभ्यधायि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ऐकात्म्ये नैयायिकैर्वैशेषिकैश्च युक्तिः प्रदर्शिता। विभुमेकमाकाशमुपेत्य कर्णशष्कुल्यवच्छिन्नस्य तस्य श्रोत्रेन्द्रियत्वं स्वीकृतम्। आकाशस्यैकत्वे न युगपत् सर्वेषां सर्वशब्दोपलम्भप्रसङ्ग औपाधिकभेदेन पर्यहारि। विभोरेकस्य कालस्य क्षणादिव्यवहारभेदः औपाधिकतयोपपादितः। दिश एकत्वेऽपि प्राच्यादिव्यवहार उपाधिभेदेन निर्व्यूढः। अनयैव रीत्या आत्मैक्येऽपि अन्तःकरणादिरूपोपाधिभेदेनैव सुखदुःखादिवैचित्र्यं सुलभोपपादनमिति श्रुतिप्रमितमैकात्म्यं पूतिकूष्माण्डायमानेन प्रत्यक्षादिना न बाधमर्हति। आत्मनानात्ववादो नैयायिकानामभ्युपगमवादः। नैयायिकशिरोमणिभिः उदयनाचार्यैः, आत्मतत्त्वविवेके ऐकात्म्यनये जयश्रीः प्रतिपादिता। तत्र[14]—

न ग्राह्यभेदमवधूय धियोऽस्ति वृत्तिः
तद्बाधके बलिनि वेदनये जयश्रीः।
नो चेदनित्यमिदमीदृशमेव विश्वं
तथ्यं, तथागतमतस्य तु कोऽवकाशः॥

इत्यद्वैतस्य सर्वमतशिरोमणिता स्फुटीकृता। अयमर्थः—ज्ञानाद्विलक्षणमर्थमपलप्य ज्ञानं न स्वीकार्हं, ज्ञानातिरिक्तस्यार्थस्यानुभवेन तद्विरोधस्य जागरूकत्वात्। तस्य ग्राह्यस्य बाधके ज्ञाने वेदान्तश्रवणमननादिना दृढे सति वेदनये वेदान्तदर्शने सर्वदर्शनापेक्षया बलिष्ठे जयश्रीः। यस्य साक्षात्कारो बाधकः तन्नित्यं स्वप्रकाशानन्दस्वरूपं मोक्षानुयाय्यद्वितीयम्। न तस्य बाधकं, य एव निराकर्ता तस्यैवात्मत्वात्, सर्वसाक्षित्वाच्च। यदि च श्रवणादिपरिपाकाभावेन सुदृढं ज्ञानं नोत्पद्यते, तदा दृश्यमात्रं व्यवहारकालावाध्यं तात्त्विकमिति वक्तुं शक्यं तार्किकादिभिः। तस्यालीकतां प्रतिपादयत्तथागतस्य बौद्धस्य मतं न कथमप्यवकाशं लभते इति। वेदनये जयश्रियमुद्घोषयतामुदयनाचार्याणामद्वैत एव परमं तात्पर्यमवगम्यते।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

"ओन्नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥"[15]

इति मंगलं स्वग्रन्थेऽपनिबध्नता तार्किकशिरोमणिना रघुनाथभट्टाचार्येणाद्वैते तात्पर्यं व्यक्तीकृतम् । परमात्मविशेषणपरस्याखण्डानन्दबोधपदस्य निषादस्थपत्यधिकरणन्यायेन कर्मधारयस्यैवोचिततया अखण्डो य आनन्दो बोधश्च स परमात्मेति निष्प्रपञ्चसच्चिदानन्दब्रह्मपरता अवसीयते । [16]"गुणातीतोऽपीशस्त्रिगुणसचिवः" इति मंगलमाचरता तत्त्वचिंतामणिकृतापि निर्गुणस्य परमार्थताधिगमिता । अद्वैते परमार्थे तात्पर्ये सत्यपि मन्दाधिकारिण उद्दिश्य, परमतनिराकरणोपयोगि-न्यायसंचारकौशलसंपिपादयिषया च, न्यायशास्त्रप्रवृत्तिः । अयमेव पन्था वैशेषिकाणामपि ।

पूर्वमीमांसाशास्त्रमपि, मन्दानविरक्तानधिकारिणः प्रत्येव प्रवृत्तम् । श्रुतीनामद्वैते तात्पर्यं न विरुन्धे । संमतिमेवाद्वैते प्रदर्शितवन्तो मीमांसकाः । मीमांसायां वेदाप्रामाण्यवादिनो बौद्धान् निराकृत्य प्रामाण्यं स्थापितम् । पारलौकिकस्वर्गादिफलकेषु यागादिषु शरीरातिरिक्तं कर्तारं भोक्तारं नित्यमात्मानमन्तरा प्रेक्षावतां प्रवृत्तिर्न भवेदिति चार्वाकबौद्धादिमतनिरासद्वारा तादृश आत्मा सिद्धान्ततः । वेदार्थनिर्णयोपयोगिनो न्याया न्यरूप्यन्त । वेदार्थनिर्णयद्वारा कर्मसु प्रवर्तनमेव मुख्यं मीमांसाप्रवृत्तौ कारणम् । अकर्तुः अभोक्तुः औपनिषदस्यात्मनः प्रतिपादनं कर्मप्रवर्तनविरोधि । तादृगात्मप्रतिपादनेनाविरक्ताधिकारिणां नोपयोगः कश्चित् । [17]"शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसंबन्धमधिक्रियते । तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यतेऽनुपयोगादधिकारविरोधाच्च" इति भगवत्पादैः प्रत्यपादि । श्लोकवार्तिक आत्मवादान्ते—

"इत्याह नास्तिक्यनिराकरिष्णु-
रात्मास्तितां भाष्यकृदत्र युक्त्या ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दृढत्वमेतद्विषयश्च बोधः

प्रयाति वेदान्तनिषेवणेन " ॥ [18]

इति वदद्भिः कुमारिलमिश्रैः वेदान्तेषु सच्चिदानन्तानन्दात्मब्रह्मप्रतिपादकेषु परमं तात्पर्यं निरूपितम्। शाबरभाष्यटीकायां बृहत्यां [19]" यस्तु ब्रह्मविदामेष निश्चयः यदुपलभ्यते न तत्तथ्यमिति, यन्नोपलभ्यते तत्तथ्यमिति, नमस्तेभ्यः, विदुषां नोत्तरं वाच्यम् "; " यदुक्तमहंकारममकारावनात्मनि आत्माभिमानाविति मृदितकषायाणामेवैतत्कथनीयं न कर्मसंगिनामित्युपरम्यते। आह च भगवान्द्वैपायनः [20] ' न बुद्धिभेदं जनयेदज्ञानां कर्मसंगिनाम् " इति रहस्याधिकारे। तस्मान्न विवृतमत्र भाष्यकारेण भगवतो वचनानुरोधान्नाज्ञानात् ' इति प्रभाकरमिश्रैः न केवलं स्वस्य भाष्यकृतः शाबरस्वामिनोऽप्यद्वैत एव तात्पर्यं, शास्त्रप्रवृत्तिस्तु सकषायानधिकारिणः प्रतीति निःसन्दिग्धं विशदीकृतम्। प्राभाकरानुयायी भवनाथोऽपि—

[21]" अथवा न वेदान्तानां चोदनैकवाक्यता। अथातो ब्रह्मजिज्ञासेति शास्त्रान्तरस्थितेः " इत्याह। [22]" आत्मानमुपासीतेति श्रुतिविहितनिर्गुणात्मतावज्ञानस्य तु—' स खल्वेवं वर्तयन् यावदायुषंब्रह्मलोकमभिसंपद्यते न स पुनरावर्तते ' इत्यपुनरावृत्त्यात्मकपरमात्मप्राप्त्यवस्थाफलसंकीर्तनान्निःश्रेयसार्थत्वम् " इति व्याकरणाधिकरणे तन्त्रवार्तिककृद्भिः कुमारिलभट्टैः स्वतन्त्रस्यात्मज्ञानस्य निर्गुणब्रह्मप्राप्तिः फलं निरूपितम्। इदं वार्तिकं व्याचक्षाणो भट्टसोमेश्वरः [23]" परमशब्दोऽनौपाधिकत्वपरः, अनौपाधिक एवात्मा ब्रह्मशब्दवाच्यः परमानन्दोपभोगहेतुत्वात् लोकशब्दवाच्यश्च सन् श्रुतौ ब्रह्मलोकमिति कर्मधारयेण विवक्षितः सूचयितुं औपाधिकरूपपरित्यागेनासंसारिरूपनिजावस्थात्मकत्वेन तत्प्राप्तेरक्षयत्वं च सूचचितुं उक्तश्रुतिनिर्दिष्टा ब्रह्मलोकप्राप्तिः परमात्मप्राप्तिशब्देन व्याख्याता। तत्प्राप्तौ बन्धककर्माभावात्प्राप्ताया अपुनरावृत्तेः अनुवादकत्वं न स पुनरावर्तत इति, न तु पृथक्फलमेतदिति वक्तुं तस्या एवापुनरावृत्त्यात्मकतोक्ता " इति व्यवृणोत्—

[24]सुखोपभोगरूपश्च यदि मोक्षः प्रकल्प्यते।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स्वर्ग एव भवेदेष पर्यायेण क्षयी च सः ।
न हि कारणवत्किंचिदक्षयित्वेन गम्यते ॥"

इति जन्यसुखस्योपभोगो निराकृतः । स्वरूपं सुखं तदा प्रकाशत इति न युज्यते, तत्सत्वे संसारदशायामपि प्रकाशापत्तेः । इष्टापत्तिरनुभववाधिता । अभिभवादप्रकाश इत्यपि न संभवति, प्रकाशमान आवरणात्मकस्याभिभवस्यासंभवादित्याशंका समुन्मिषति । तथापि वायुविक्षिप्तदेशस्थितदीपप्रभावत् सांसारिकदुःखसंवलितस्य स्वरूपसुखप्रकाशस्य सतोऽप्यसत्त्वव्यवहारः । निर्वातदेशावस्थितदीपप्रभावत् मुक्तौ स्वरूपसुखप्राप्तिव्यवहारः सूपपादः । यथाहुः—

"निजं यत्स्वात्मचैतन्यमानन्दश्चेष्यते च यः ।
यच्च नित्यविभुत्वादि तेनात्मा नैव मुच्यते ॥" इति ।

एतावता अकर्त्रभोक्त्रात्मकासंसारिब्रह्मस्वरूप आत्मेति ज्ञानं तत्त्वज्ञानम् । सच्चिदनन्तानन्दात्मस्वरूपब्रह्मप्राप्तिरावरणनिवृत्तिरूपा तत्फलम् । आत्मज्ञानं स्वतन्त्रमेव फलहेतुः । न कर्माङ्गात्मसंस्कारः । यावज्ज्ञानोदयं कर्मानुष्ठेयम् । उदिते ज्ञाने कर्म नानुष्ठेयम्-इत्यद्वैतं सम्यगेव प्रतिपादितं कुमारिलप्रभाकरप्रमुखैर्मीमांसकधौरेयैः ।

शैवानामप्यद्वैत एव परमं तात्पर्यम् । तथाहि—शिवैकीभावेन शिवानंदानुभवो मोक्ष इति तेषां सिद्धान्तः । तत्र प्रमाणानि वचनानि—

[25]"योऽसौ सर्वगतो देवः सर्वात्मा सर्वतोमुखः ।
सर्वतत्त्वमयोऽचिन्त्यः सर्वस्योपरि संस्थितः ॥
सर्वतत्त्वव्यतीतश्च वाङ्मनोनामवर्जितः ।
सोऽहमेवमुपासीत निर्विकल्पेन चेतसा ॥
यदेवं निष्कलं ज्ञानं शाश्वतं ध्रुवमव्ययम् ।
निर्विकल्पमनिर्देश्यं हेतुदृष्टान्तवर्जितम् ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अलिंगमक्षरं शान्तं विषयातीतगोचरम् ।
अविभाव्यमसन्देहं तदहं नात्र संशयः ॥
अहमेव परो देवः सर्वमन्त्रमयः शिवः ।
सर्वमन्त्रव्यतीतश्च सृष्टिसंहारवर्जितः ॥
मया व्याप्तमिदं सर्वं दृश्यादृश्यं चराचरम् ।
अहमेव जगन्नाथो मत्तः सर्वं प्रवर्तते ॥
अनेकाकारसंभिन्नं विश्वं भुवनसंचयम् ।
शिवाद्यवनिपर्यन्तं तत्सर्वं मयि संस्थितम् ॥
यच्च किंचिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा ।
बहिरन्तर्विभागेन तत्सर्वं व्यापितं मया ॥
अहमात्मा शिवो ह्यन्यः परमात्मेति यः स्मृतः ।
एवं यो भावयेन्मोहान्न शिवत्वमवाप्नुयात् ॥
शिवोऽन्यस्त्वहमप्यन्यः पृथग्भावं विवर्जयेत् ।
यः शिवः सोऽहमेवेति अद्वैतं भावयेत्सदा ॥
अद्वैतभावनायुक्तः सर्वत्रात्मनि संस्थितः ।
सर्वगं सर्वदेहस्थं पश्यते नात्र संशयः ॥
एवमेकात्मभावेन संस्थितस्य तु योगिनः ।
सर्वज्ञत्वं प्रकल्प्येत विकल्परहितस्य च ॥
योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः ।
अकायो निर्गुणो ह्यात्मा सोऽहमस्मि न संशयः ॥
अविज्ञातः पशुः सोऽसौ सृष्टिधर्मं समाश्रितः ।
विज्ञातः शाश्वतः शुद्धः स शिवो नात्र संशयः ।

इत्यादीनि । निर्मलनिरतिशयस्वप्रकाशज्ञानानन्दः शिवस्य स्वरूप-लक्षणम् । पञ्चविधकृत्यकारित्वं तटस्थलक्षणम् । सृष्टिस्थितिसंहारतिरोधानानुग्रहाः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पञ्चकृत्यानि । शक्तिमतः सृष्ट्यादिकर्तृतया न निर्विकारत्वानुपपत्तिः । विशेषणीभूतमायाया विकारित्वाद् विशिष्टस्य स्रष्टृत्वादिव्यपदेशः । "यतो वा इमानि भूतानि जायन्ते" इत्यागमबलेन तस्योपादानत्वं; पञ्चम्याः प्रकृतित्वरूपोपादानत्वबोधकत्वात् । कार्यानुकूलचिकीर्षादिमत्तया निमित्तत्वमपि । जीवोऽपि सच्चिदानन्दस्वरूपः । स्वस्मिन् परमशिवाभेदसाक्षात्कारेण मुच्यते । श्रुतिस्मृत्यागमविहितानि कर्माणि ज्ञानोत्पत्तावुपयुज्यन्ते । प्रकाशतदाश्रययोरिवेषद्भेदे सत्यभेद ऐक्यम् । संसारदशाया मप्यैक्यमस्त्येव । आवरणवशादनभिव्यक्तं मुक्तावभिव्यज्यते । अरणौ तादात्म्येन स्थितो वह्निर्यथा मन्थनेनाभिव्यज्यते तद्वत् । स्वप्रकाशचिदानन्दस्वरूपोऽपि जीवः स्वाभिन्नशिवानन्दमनुभवतीति शैवानामभिप्रायः । ज्ञानमात्रस्य मोक्षसाधनता, अज्ञानमावारकं, ज्ञानेन तस्य निवृत्तिः, मोक्षदशायां स्वप्रकाशसुखव्यतिरिक्तस्य पाशस्यानवभास इत्यादिकं वेदान्तिभिरप्यङ्गीकृतमेव । ज्ञानमात्रनिवर्त्यत्वेनावरणतत्कार्याणां मिथ्यात्वमवचनसिद्धमिति शैवानामद्वैते परमं तात्पर्यमुन्नीयते ।

मन्त्रतत्त्वविदोऽप्यद्वैतमेव परमार्थमाश्रिताः । प्रसिद्धं "नमः शिवाय" इति पञ्चाक्षरमन्त्रं विमृशामः । 'नमः' इति नैकं पदम् । किंतु न इति मः इति पदद्वयम् । मपदं जीवं बोधयति । न इति समारोपितं जीवत्वं निषिध्यते । नमः इति पदद्वयेन समारोपिते जीवत्वे निषिद्धे "शिवाय" इति परममङ्गलस्य ब्रह्मणोऽभेदः प्रतिपाद्यते । "यूपाय दारु" इत्यत्र चतुर्थ्याः प्रकृतित्वं तादात्म्यरूपमर्थ इति संप्रतिपन्नम् । अतो महावाक्यवत् पञ्चाक्षरमन्त्रोऽयं निर्विशेषब्रह्मप्रतीतिं जनयति । अस्य मन्त्रस्यार्थान्तराणि पद्मपादाचार्यकृतपंचाक्षरभाष्ये द्रष्टव्यानि । सर्वेषां महामन्त्राणाम् अद्वितीयब्रह्मपरतां शिष्टा अभ्युपगच्छन्ति ।

शाक्ता अपि अद्वितीयमेव परमार्थं मन्यन्ते । अत एव सर्वेषां बीजाक्षराणां बिन्द्वन्तता । सर्वेषां तत्त्वानामुपादानं बिन्दुः । तदुक्तम्—

[26] "लयादिभेदः प्रागुक्तो यदुपाधौ शिवस्य तु ।
स बिन्दुरिति मन्तव्यः ॥" इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शक्तिरूपोपाधेः परिणामित्वेऽपि शिवस्य विवर्तोपादनत्वात् । निर्गुणः निर्विकारः शिवः यो ब्रह्मेति वेदान्तिभिरुच्यते, स एव बिन्दुः बीजाक्षरान्तोच्चार्यमाणस्य बिन्दोरर्थ इति व्यक्तं शुद्धब्रह्मपर्यवसानं बीजाक्षराणाम् ।

उदाहरणार्थं "ऐं" इति वाग्भवं विवृणुमः । अ इति ऋग्वेदस्य प्रथमाक्षरम् । 'इ' इति यजुर्वेदस्य । 'अ' इति साम्नः । अकारेकारयोगे 'ए' इति भवति । पुनः अकारस्य एकारेण योगे "ऐ" इति भवति । वेदत्रयमैकारेण गम्यते । [27]" सर्वे वेदा यत्पदमामनन्ति " इति श्रुत्या सच्चिदानन्दाद्वितीयं ब्रह्मैव त्रयीपर्यवसानभूमिः । एतदावेदयति बिन्दुरैकारोत्तरमुच्चार्यमाणः । एवमेव बीजाक्षरान्तराणां ब्रह्मणि पर्यवसानं मन्त्रशास्त्रादवगन्तुं शक्यम् । " मिथ्याजगदधिष्ठाना ", " ब्रह्मात्मैक्यस्वरूपिणी ", " निर्भेदा ", " भेदनाशिनी ", " अहमित्येव विभावयेन्महेशीम् " इत्यादीन्यपि प्रमाणानि शाक्ततन्त्राणामद्वैतपरतायां साधकानि ।

वैयाकरणानां दर्शनमप्यद्वितीये ब्रह्मतत्त्वे पर्यवस्यति । भगवान् पाणिनिः " वृद्धिरादैच् " इति असुसूत्रत् । विधेयबोधकस्य वृद्धिपदस्योद्देश्यवाचकपदानन्तरं प्रयोगः साधुः यथा " अदेङ्गुणः " इति समनन्तरसूत्रे । तथापि प्रथमतो वृद्धिपदं प्रयुञ्जानस्य पाणिनेरयमाशयः—प्रकरणोपपदादिसंकोचकरहितं वृद्धिपदं देशतः कालतो वस्तुतश्च परिच्छेदशून्यं वस्तु ज्ञापयति । तत्परममङ्गलरूपं ब्रह्मैव । तत्प्रयोगार्थं ब्रह्मस्मरणमावश्यकम् । तेन शास्त्रादौ मङ्गलं कृतं भवति । शास्त्राध्ययनस्य परमं प्रयोजनं ब्रह्मेति सूचितमपि भवतीति । शब्दब्रह्मणि निष्णातो हि परं ब्रह्माधिगच्छति । अत एव भाष्यकारो भगवान् पतञ्जलिः[28]" कथं वृद्धिरादैच् इति । एतदेकमाचार्यस्य मङ्गलार्थं मृष्यताम् । माङ्गलिक आचार्यः महतः शास्त्रौघस्य मङ्गलार्थं वृद्धिशब्दमादितः प्रयुङ्क्ते । मङ्गलादीनि हि शास्त्राणि प्रथन्ते, वीरपुरुषाणि च भवन्ति ; आयुष्मत्पुरुषाणि च । अध्येतारश्च वृद्धियुक्ता यथा स्युः " इति । अथेत्यादिप्रयोगे मङ्गलसंभवेऽपि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

शास्त्रस्य प्रयोजनं सूचयितुं वृद्धिशब्दं प्रयुयुजे । "यो वै भूमा तदमृतम्" इत्यादाविव धर्मेणापि धर्मिनिर्देशो घटते । वार्तिककारः कात्यायनोऽपि [29] "सिद्धे शब्दार्थसंबंधे" इति वार्तिकमारभमाणः सिद्धपदं निरदिशत् । कूटस्थनित्यं ब्रह्मैव सिद्धपदस्यार्थः । नान्ये । तेषु केचित् परिणामिनित्याः, केचिज्जन्याः । सिद्धपदमादौ प्रयुञ्जानः तदर्थं परममङ्गलं ब्रह्म स्मरन् मङ्गलं ग्रन्थादौ प्रणिनाय, प्रयोजनमपि शास्त्रस्य निरदिशत् । अत एव भाष्यकारः [30] "माङ्गलिक आचार्यो महतः शास्त्रौघस्य मङ्गलार्थं सिद्धशब्दमादितः प्रयुङ्क्ते" इत्याह । अष्टाध्याय्या अन्तिमं सूत्रं "अ अ" इति । अकारो निर्गुणं ब्रह्म बोधयति । माहेश्वराणां सूत्राणां विमर्शकेन नन्दिकेश्वरेण—

"अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु" इत्यकारार्थः सर्ववस्त्वनुस्यूतं निर्गुणं ब्रह्मे ति प्रत्यपादि । अ इत्यस्याभ्यासेन तदर्थे तात्पर्यं व्यञ्जयति । "अ अ" इति सूत्रभाष्यप्रदीपव्याख्यातारो भट्टनागेशोपाध्यायाः "एवं सूत्रकारेणापि विष्णुवाचकाकारस्य द्विरुच्चारणाद्विष्णुस्मरणरूपं मङ्गलमाचरितम् । किं च [31] 'अकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना नानारूपा भवति' इति श्रुतेः अकारस्य सर्वशब्दप्रकृतित्वात् 'अ इति ब्रह्म' इति शब्दब्रह्मरूपत्वश्रवणाच्च महामङ्गलार्थता । वार्तिककृतापि "भगवतः पाणिनेराचार्यस्य सिद्धम्" इति सिद्धशब्दोच्चारणेन कृतं मङ्गलम् । भगवता पतञ्जलिनापि 'एकशेषनिर्देशोऽयम्; अ अ इत्यन्ते वदता कृतं मङ्गलम्, एवं च तदध्यायिनां प्रवक्तॄणां च सकलपुरुषार्थसिद्धिर्दर्शिता । यथोक्तम् —

"इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥" इति सर्वेष्टसिद्धिः इति उदद्योतयन् । भगवता हरिणा—

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥"

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति वदता, ब्रह्माद्वैतं परमार्थः, सर्वं दृश्यं तद्विवर्त इति स्फुटमेवोक्तम् ।

[32]"यत्र द्रष्टा च दृश्यं च दर्शनं चापि कल्पितम् ।
तस्यैवार्थस्य सत्यत्वमाहुस्त्रय्यन्तवादिनः ॥"

इत्यनेन, [33]" यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा " इति श्रुत्यर्थः संजगृहे । ब्रह्मणः महासामान्यरूपता,

[34]" संबंधिभेदात्सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥
तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते ।
सा नित्या सा महानात्मा तामाहुस्त्वतलादयः ॥"

इत्यनेनाविष्कृता ।

[35]" आश्रयीभूततत्तत्संबंधिभेदेन कल्पितभेदा सत्तैव महानात्मा । गोत्वादिकं व्यक्तिभेदेन परमार्थतो भिन्नं नैयायिकादीनामिव नैवास्ति । गोः सत्तैव गोत्वमिति व्यपदिश्यते । तस्याः सर्वे गवादयः शब्दा वाचकाः । सा प्रातिपदिकार्थो, धात्वर्थश्च । सा उत्पत्तिनाशरहिता । सर्वोऽपि प्रपञ्चः तस्या एव विवर्तः । देशतः कालतो वस्तुतश्चापरिच्छिन्नेति सत्तैव महानात्मा " इति हेलाराजो व्याचख्यौ । जातिपदार्थवादिनो वाजप्यायनाचार्यस्य मतमनुसृत्येदं हरिकथनम् । द्रव्यपदार्थवादिनो व्याडिनो मतानुसारेण हरिणैव—

[36]" सत्यं वस्तु तदाकारैरसत्यैरवधार्यते ।
असत्योपाधिभिः शब्दैः सत्यमेवाभिधीयते ॥
अग्रवेण निमित्तेन देवदत्तगृहं यथा ।
गृहीतं गृहशब्देन शुद्धमेवाभिधीयते ॥"

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति ब्रह्मैव सर्वपदानामर्थ इत्यभिहितम्। [37]"सिद्धे शब्दार्थसंबंधे" इति वार्तिकविवरणावसरे [38]"द्रव्यं हि नित्यम्" इति वदता पतञ्जलिना असत्योपाध्यवच्छिन्नं ब्रह्मैव द्रव्यं सर्वशब्दार्थ इति स्फुटितम्। किं च—

[39]"न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः।
अतत्त्वमिति मन्यन्ते तत्त्वमेवाविचारितम्" ॥

इति हरिकारिकां, "नेहाद्वैतनये सत्यासत्ये द्वे रूपे स्तः। किंतु पारमार्थिकमेकमेवाद्वयं तत्त्वम्। तच्चानादिसिद्धाविद्याविलसितसहं प्रमातृविषयतया यथातत्त्वमनवभासमानम्" इति अनेकविकल्पपरिघटिताकाररूपतया व्यवहारमवतरति। तदेवाकारनानातोन्नीयमानास्वरूपभेदं चकास्ति, नान्यत्। अविचारितरमणीयं परीक्षया व्यवस्थापितं तत्त्वमेवाभिन्नं भेददर्शनव्यवस्थिताः तैर्थिका भेदात्मकमतत्त्वं मन्यन्ते। विचारेण अविद्याविलये ब्रह्मैकनिष्ठता दर्शनानाम्।

[40]"विकारापगमे सत्यं सुवर्णं कुण्डले यथा।
विकारापगमो यत्र तामाहुः प्रकृतिं पराम्॥"

इति सोदाहरणं ब्रह्मणः प्रकृतित्वं विवृतम्। कूटस्थे परस्मिन् ब्रह्मणि सच्चिदानन्दरूपे प्रत्यगभिन्नेऽवगते अनाद्यविद्यानिवृत्तौ तादृग्ब्रह्मात्मना अवस्थानलक्षणं निःश्रेयसं सेत्स्यतीति पाणिनीयदर्शनसिद्धान्तं माधवाचार्याः निरणयन्। [41]"मस्करमस्करिणौ वेणुपरिव्राजकयोः" इति पाणिनीयं सूत्रम्। अत्र भाष्यम्—"कथं मस्करी परिव्राजक इति, इनिनैतन्मत्वर्थीयेन सिद्धं, मस्करोऽस्यास्तीति। न वै मस्करोऽस्यास्तीति, मस्करी परिव्राजकः। किं तर्हि? माकृत कर्माणि, माकृत कर्माणि; शान्तिर्वः श्रेयसीत्याह; अतो मस्करी परिव्राजकः" इति। "अयं माकृत अयं माकृतेत्युपक्रम्य शान्तितः काम्यकर्मप्रहाणिः युष्माकं श्रेयस्करीत्युपदेष्टा मस्करीत्युच्यते" इति कैयटः। अयं त्यक्तवान् अयं त्यक्तवान् कर्माणीत्युपक्रम्य स्वयं कर्माणि परित्यज्य परान् प्रत्युपदेष्टेत्यर्थः" इति

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नागेशभट्टैरुपवर्णितः। भाष्ये "कर्माणि" इति पदं सर्वकर्मपरं, संकोचकाभावात्।

[42]"आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते॥"

इति भगवदुक्तेश्च। परिव्राजकस्य कर्मणां त्याग आत्मज्ञानार्थ इति ज्ञानमेव मोक्षसाधनं न कर्मेति पाणिनीयाभिप्रायो गम्यते। इत्थं पाणिनीयमपि दर्शनमद्वैतपर्यवसायि।

यदि ब्रह्मण एव सत्यता, यदि च प्रपंचमिथ्यात्वं सर्वेषां दार्शनिकानां सम्मतं, स्वस्वशास्त्रे किमिति न स्पष्टं प्रतिपादयन्ति अद्वैतं च खण्डयन्तीति चेत्। अधिकारिभेदेन शास्त्राणां प्रवृत्तिरेव तत्र हेतुः। यो हि दृढया प्रपंचसत्यत्ववासनया वासितः तं प्रति प्रपंचमिथ्यात्वबोधने इदं सुतरामसंभवीति व्याक्षिप्तचेता भवेत्। प्रत्यक्षादिप्रमाणप्राबल्यबुद्ध्याप्रपञ्चमिथ्यात्वसाधकश्रुतियुक्तिषु न विश्वसेत्। अप्रामाण्यमेव निश्चिनुयात्। तन्माभूदिति गुडजिह्विकानयेन प्रपञ्चसत्यत्वव्यवहारः। सुखदुःखादिव्यवस्थां प्रत्यक्षावगतामुपाधिभेदेनाप्यसंपाद्यां मन्वानं प्रति नानात्मवादः प्रवर्तितः। न्यायशास्त्रे विभोरेकस्याकाशस्य श्रोत्रत्वे सर्वैः सर्वान् श्रुणुयादिति शंका उपाधिभेदेन परिहृता। उपाधिभेदेन विरोधपरिहारे दृढमवगते तं प्रत्यात्मैक्योपदेशः सुलभः। मुक्तिदशायां दृश्यस्याभान बहूनां सम्मतम्। तदाऽदर्शनादेवासत्त्वमपि सुलभम्, ज्ञानमूलत्वात्सत्त्वस्य। व्यवहारः स्वाभाविक इति केचित्; औपाधिक इति वेदान्तिनः, सुगताश्च। यथाधिकारं निरूपणभेदः संजाघटीति। श्रुतयोऽपि विरक्तानामधिकारिणां सर्वकर्मत्यागं विदधति। अविरक्तान्प्रति काम्यकर्माणि विदधति। तेषां बन्धनहेतुतामवगतवन्तं अत एव तेभ्यो निवृत्तं प्रति, नित्यनैमित्तिकानि चित्तशुद्धये विदधति। एवं बहुधाधिकारिभेदेन प्रवृत्तानामपि श्रुतीनामैकात्म्य एव परमं तात्पर्यम्। अधिकारिभेदेन मार्गाणां प्रवृत्तिः स्कान्दे सूतसंहितायां भगवता व्यासेन निरूपिता—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

[43] " अतोऽधिकारिभेदेन मार्गा मानं न संशयः ।
ईश्वरस्य स्वरूपे च बन्धहेतौ तथैव च ॥
जगतः कारणे मुक्तौ ज्ञानादौ च तथैव च ।
मार्गाणां ये विरुद्धांशा वेदान्तेन विचक्षणाः ॥
तेऽपि मन्दमतीनां हि महामोहावृतात्मनाम् ।
वाञ्छामात्रानुगुण्येन प्रवृत्ता न यथार्थतः ।
दर्शयित्वा तृणं मर्त्यो धावन्तीं गां यथाग्रहीत् ॥
दर्शयित्वा तथा क्षुद्रमिष्टं स च महेश्वरः ।
पश्चात्पाकानुगुण्येन ददाति ज्ञानमुत्तमम् ॥ " इति ।

अयमभिप्रायः । सांख्यामीमांसकाश्चेश्वरं निराकुर्वन्ति । योगिन ईश्वरं साधयन्ति । नित्यज्ञानाधिकरणमीश्वर इति गौतमीयाः । प्रकृतिपुरुषयोरविवेकः संसारमूलमिति सांख्याः पातञ्जलाश्च । प्रकृतिपुरुषयोर्विवेकख्याति अविवेकनिवृत्तौ स्वरूपप्रतिष्ठा मुक्तिरिति सांख्याः पातञ्जलाश्च । आत्मविशेषगुणानां समुच्छेदो मुक्तिरिति नैयायिकाः । एवं बहुधा विप्रतिपत्तयः वादिनां प्रसिद्धाः । अनादि-मायामोहितानां तेषां तेषामधिकारिणां यथाधिकारं मार्गप्रदर्शने तमनुसरन्तः उत्तरोत्तरमुत्तमाधिकारितां प्राप्य श्रुतिप्रदर्शितेन पथा संचर्य क्षेमं प्राप्नुवन्तु इत्याशयेनैव विभिन्नानां दर्शनानां प्रवृत्तिः । शास्त्रेषु मार्गान्तरनिन्दाः " न हि-निन्दा निन्द्यं निन्दितुं प्रवृत्ता, अपि तु विधेयं स्तोतुम् " इति न्यायमवलम्ब्य प्रवृत्ता, न तात्पर्येणेति । उक्तं च पुष्पदन्तेन ।

[44] " त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव " इति ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एवं संग्रहेण बहूनां दर्शनानामद्वितीयात्मनि तात्पर्यमुपावर्णयम् । नित्यानित्यवस्तुविवेकेहामुत्रार्थभोगविरागशमादिसाधनषट्कतीव्रमुमुक्षुत्वरूपसाधनचतुष्टयसंपत्तिः कस्यचिदेव भवति । आह भगवान्—

"मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥" इति ।

उपनिषदां श्रवणादिजन्य आत्मसाक्षात्कारो यद्यपि कस्यचिदेव परिशुद्धचित्तस्याधिकारिणः स्यात्, तथा सति सर्वदर्शनानां परमं तात्पर्यमद्वितीये आत्मनि सच्चिदानन्दस्वरूपे इति ज्ञानेन किं प्रयोजनमिति शङ्का समुन्मिषति । तस्या एवं परिहारः । भारतीयानां समाजस्य संघटनं स्थैर्यं परस्परमात्मीयता च ईदृगैकात्म्यज्ञानमूलकम् । आ सेतोरा च हिमालयात् आ सिन्धोरा च कामरूपात् भारते भगवत्पादैः शंकराचार्यैः आध्यात्मिकमैक्यं (spiritual integration) महता परिश्रमेण समपादि यत् सांप्रतमपि समनुवर्तते । भाषासु संस्कृतमिव तत्त्वज्ञानेषु ज्ञानमद्वैतात्मविषयं जनानामैकमत्यसंपादकम् । न केवलं भारतीयानां सकलप्रज्ञजनतायां आध्यात्मिकमैक्यमनेन संपादयितुं शक्यम् । दृश्यते हि चीनजपान् प्रभृतिषु पौरस्त्यदेशेषु बौद्धमतप्रचारनिबन्धनं संघटनं भावैक्यं च । रागद्वेषकलुषिते, परस्पराभिभवप्रयत्नैः तादात्विकैरायोधनैश्च विशीर्णे जगति इयमद्वैतभावनैव जीवातुः । धनिकानां दरिद्राणां, बलिष्ठानां दुर्बलानां, कृष्णानां श्वेतानां, नियोज्यानां नियोक्तृणां, संपन्नानां हीनानां, एवं विरुद्धधर्माणां परस्परं विरोधेन, सुन्दोपसुन्दन्यायेन, मात्स्यनयेन वा संततवर्धमानद्वेषशालिनि जनसमुदये, अल्पमपि हिमालयीकृत्य परस्परवैरस्यवैषम्यविरोधसंधुक्षणेन स्वार्थैकसाधनतत्परे वाचाटे राज्यनीतिज्ञमन्यवर्गे क्षणमात्रतः बहुलक्षसंख्यजनावासानां नगराणां नैकसहस्रक्रोशत एव विध्वंसकप्रतिक्षणनूतननूतनविचित्रायुधनिर्माणमात्रव्यग्रे राज्यनियन्तृवर्गेऽन्तरेव भीतभीतायां जनतायां सौभ्रात्रं प्रेमाणं च विना न किंचिदभयकारणम् । तच्च अद्वैतभावनासाध्यम् । वैज्ञानिकैराधुनिकैः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

साधनैः संप्रति जगदत्यन्तं संकुचितम्। प्राकृत्यः काश्चन शक्तयः वशीकृताः। यथा यथा प्राकृतशक्तिवशीकारोऽधिको भवति तथा तथा आत्मा दूरीभवति। यथा यथा स दूरीभवति, तथा तथा रागद्वेषयोः वृद्ध्या, संनिहितो जागतिकः संवर्तः। तत्परिहारसाधनमद्वैतभावनैव। धनसंपत्तौ, धान्यसमृद्धौ, सुखसामग्रीपौष्कल्ये, वसतिसौविध्ये, आयुरारोग्यवृद्धौ, विश्वविद्यालयेष्वध्ययनतो ज्ञानबाहुल्ये, एवमन्येषु सत्स्वपि ईप्सितेषु जनानां रागद्वेषौ कथं परिहियेयाताम्। न हि न दृष्टौ सर्वथा समानेष्वपि रागद्वेषौ। तावेव महाशनौ देहवासना-लोकवासनामूलौ सर्वस्याप्यनर्थस्य कारणम्। देहवासना-लोकवासने एव लोके सर्वत्र ताण्डवं नटतः। यावन्न तयोः शुभया वासनया अभिभवः, तावद्विश्वसौहार्दस्य सौभ्रात्रस्य च शब्दमात्र एव स्थितिः। तयोरचलः शिलामयो हस्तिभार ऐकात्म्यज्ञानमेव। भगवता भाष्यकारेण भगवत्पादेन [46]"सर्वत्र प्रसिद्धोपदेशात्" इति सूत्रभाष्ये—[47]"सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत" इति वाक्यं विवृण्वता, "यस्मात्सर्वं ब्रह्मैव अतो रागद्वेषौ न संभवतः, तस्मात् शान्त उपासीत" इति भणितम्। ऐकात्म्यज्ञानं रागद्वेषनिवृत्तिसाधनमिति श्रुतिसंमतमिति संभाव्यते। विभिन्नान्यपि व्यवहारे पारमार्थिकस्य अद्वैतस्य प्रापकाणि सर्वाणि मतानि इति निश्चये मतीयानां कलहानां नावसरो भवेत्। दुःखितं दृष्ट्वा स्वयमेव दुःखित इति तत्परिहाराय प्रयतेत। एवं दुःखमूलानां बहूनां भ्रमाणां परिहारः सुकरः। दार्शनिकैः तत्त्वस्योपदेशमात्रं कर्तुं शक्यम्। परं तस्य फलपर्यन्तं निर्वहणे विश्वविस्मयनीयमहिमानोऽलौकिकप्रतिभाशालिनो भगवत्पादप्रभृतय आचार्यवर्याः अशोकप्रमुखाः चक्रवर्तिनश्च समर्थाः। तथापि दार्शनिकैः स्वयमद्वैतभावनया परेषां शुश्रूषूणां यावच्छक्ति तत्संपादनेन चोपकर्तुं युक्तम्।

[48]"आत्माभ्योधेस्तरंगोऽस्यऽहमिति गमने भावयन्नासनस्थः
संवित्सूत्रानुविद्धो मणिरहमिति वाऽस्मीन्द्रियार्थप्रतीतौ।
दृष्टोऽस्यात्मावलोकादिति शयनविधौ मग्न आनन्दसिंधावन्तर्निष्ठो मुमुक्षुः स खलु तनुभृतां यो नयत्येवमायुः॥"

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

इति भगवत्पादसूक्तिं स्मारयामि । अस्या अयमाशयः । शरीरिणां मध्ये मुमुक्षुर्यः एवमायुर्नयति सोऽन्तर्निष्ठो भवति । आत्मा महान् समुद्रः । तस्य तरङ्गाः तदंशाः । ते अविभक्ताः, समुद्रात् समुद्र एव इतस्ततो गच्छन्ति । जीवोऽपि ब्रह्मणोंऽशः [49]" ममैवांशो जीवलोके जीवभूतः " इति स्मृतेः । गमनसमये आत्माम्भोधेः तरङ्गोऽस्यहमिति भावयेत् । यदोपविष्टः तदा संविद्रूपे सूत्रे सर्वजीवव्यापिनि मणिगणा इव सूत्रे प्रोतो मणिरहमिति भावयेत् । [50]" मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव " इति गीता । इन्द्रियार्थानां शब्दादीनां प्रतीतौ आत्मन अवलोकाद् दृष्टोऽस्मीति भावयेत् । इन्द्रियद्वारा निर्गतस्य मनसो वृत्तौ अर्थाकारायां चैतन्यं प्रतिफलति । ससाक्षिकान्तःकरणवृत्तिः ज्ञाधात्वर्थः । शब्दाकारवृत्तिफलितचैतन्यं शब्दज्ञानम् । एवं विषयान्तरेष्वपि । विषयाकारवृत्तिं परित्यज्य चैतन्यमात्रमात्मानं जानीयात् । [51]" प्रतिबोधविदितं मतम् " इति " केनश्रुतिः । यदा शेते, स्वपिति, तदा आनन्दसिन्धौ मग्नोऽहमिति भावयेत् । [52]" यत्रैतत्स्वपिति नाम सता सोम्य तदा संपन्नो भवति स्वमपीतो भवति स्वं ह्यपीतो भवति " इति श्रुतेः । सुषुप्तौ ब्रह्मस्वरूपमानन्दमनुभवति । अत आनन्दसिन्धौ मग्न इति भावयेदित्युच्यते । एवंरीत्या भावना नाधिकं प्रयत्नमपेक्षते । एवमेव-

[53]" वैराजव्यष्टिरूपं जगदखिलमिदं नामरूपात्मकं स्या-
दन्तस्थप्राणमुख्यात् प्रचलति च पुनर्वेत्ति सर्वान् पदार्थान् ।
नायं कर्ता न भोक्ता सवितृवदिति यो ज्ञानविज्ञानपूर्णः
साक्षादित्थं विजानन् व्यवहरति परात्मानुसंधानपूर्वम् " ॥

इति भगवत्पादसूक्तिरपि परिशीलनीया । शास्त्रजन्यं ज्ञानं अनुभवश्च ज्ञानविज्ञाने । ताभ्यां पूर्णः साक्षात् इत्थं विजानन् परात्मानुसन्धानपूर्वं व्यवहरति । स्थूलं सर्वं विराडित्युच्यते । नामरूपात्मकमिदं जगत् तत् व्यष्टिरूपमिति पश्यन् रागद्वेषादिवर्जितो व्यवहरति । करचरणाद्यवयवोपेतं व्यष्टिः । अन्तस्थानां प्राणानां स्वामिनो जीवरूपात् चैतन्यात् चलती तथान्तः

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

करणवृत्तौ प्रतिफलितात् तस्मात् सर्वान् पदार्थान् वेत्ति। यथा सूर्यः सर्वेषां प्राणिनां तासु तासु क्रियासु तमोरूपप्रतिबन्धनिवृत्तिद्वारा हेतुरपि स्वयं न कर्ता, नापि भोक्ता, तथा जीवः सर्वेन्द्रियप्राणशरीरचलनहेतुरपि न कर्ता, न भोक्तेति जानन् व्यवहरति। एष उपदेशो भगवत्पादानां सर्वैः सर्वदानुसंधेयः, येनानन्तदुःखहेतावपि जगति व्यवहरन् रागद्वेषवर्जितः शोकमोहाविवशः सुखं जीवेत्।

परमहंसपरिव्राजकाचार्याणां तपोमूर्तीनां ज्ञानवृद्धानां कामकोटिपीठाधीश्वराणां श्रीचन्द्रशेखरेन्द्रसरस्वतीस्वामिपादानां अशीतितमाब्दपवित्रस्मृतये प्रतिहायनं कर्तव्यतया नियमितयोः उपन्यासयोः वत्सरेऽस्मिन् एतत्समित्यधिकृतैः अहं न्ययोजिषि। असमर्थमन्योऽपि दार्शनिकविषयपरिशीलनात् मम बुद्धिशुद्धिर्भवेदित्येव प्रावर्तिषि। श्रीमतां विश्वनाथार्यप्रमुखाणां एतत्समितिसदस्यानां मय्यव्याजः पक्षपात एव ममात्र नियोजने निदानमिति मन्ये।

ज्ञानचन्द्रकलाचूडः सर्वविद्याधिदेवता।
अद्वैतात्मानुभूत्यास्मानुद्धरेन्मोहसागरात्॥

इति शम्॥

—o—

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लक्ष्यीकृतानां सूची

१. श्लोकवार्त्तिकम् प्रतिज्ञाग्रन्थः श्लो. ४
२. भगवद्गीता. ९-२१.
३. तैत्तिरीयसंहिता. ३-२-५
४. बृहदारण्यकोपनिषत् १-४-७
५. बृ. उपनि. शांकरभाष्यम् १-४-७
६. बृ. भा. वार्त्तिकम् १-४-४०५, ४०६, ४०७
७. सूतसंहिता यज्ञवैभवखण्डः ८-२२-२३-२४-२५
८. बृहदा. उप. ४-५-१०
९. ब्र. सू. शांकरभाष्यम् १-१-१
१०. द्रव्यसंग्रहः १-२-३७
११. सर्वदर्शनसंग्रहः of Madhava आर्हतदर्शने उद्धृतोऽयं श्लोकः
१२. द्रव्यसंग्रहः ३-५६
१३. ब्रह्मसूत्रम् २-२-३३
१४. Indian Philosophy by Dr. S. Radhakrishnan. Vol. I Page 340
१५. Jaina Psychology, by Mohanlal Mehta. Page 171-172.
१६. श्लोकवार्त्तिक-न्यायरत्नाकरः शून्यवादे १५-१६-१७
१७. सर्वदर्शनसंग्रहे बौद्धदर्शनम्
१८. श्लोकवार्त्तिक-निरालंबनवादे ७२-७३
१९. न्यायरत्नाकरे ७२-७३
२०. श्लोकवार्त्तिकव्याख्या सुचरितमिश्रस्य निरालंबनवादे ७२-७३
२१. श्लो. वा. निरा. २०१
२२. श्लो. वा. सुचरितमिश्रः निरालंबनवादे २०१
२३. छान्दोग्योपनिषत् ६-२-१
२४. श्लो. वा. भट्टोंबेकटीका निरालंबनवादे २०१
२५. शाबरभाष्यम् १-१-५
२६. तै. आरण्यकम् १०-१
२७. मध्यमकावतारः ६-२५
२८.. मध्यमकवृत्तिः of चन्द्रकीर्त्तिः १५-२
२९. मध्यमकशास्त्रम् २४-१०
३०. do २५-२४
३१. मध्यमकशास्त्रम् २५-२४
३२. ब्र. सू. शांकरभाष्यम् ३-२-१७
३३. तैत्तिरीयोपनिषत् २-४-१
३४. मांडूक्यकारिका वतैथ्यप्रकरणम् ३२
३५. मध्यमकावतारः ६-१५२

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

३६. तत्त्वसंग्रहः ३३४०
३७. तै. उ. २-१-१
३८. बृ. उ. ३-९-२७-७
३९. बृ. उ. ४-४-२२
४०. बृ. उ. ३-८-७
४१. बृ. उ. सुरेश्वरवार्त्तिकम् १-४-४१०
४२, ४३. आनन्दगिरिः १-४-४१०
४४. बृ. उ. सुरेश्वरवार्त्तिकम् १-४-४०८
४५. वात्स्यायन, कामसूत्रम् ७-२-५३, ७-२-५१
४६. do १-२-४९
४७. do ७-२-५४
४८. ब्र. सू. १-१-३
४९. ब्र. सू. २-१-११

II Lecture

१. सांख्यकारिका १-२
२. छान्दोग्योपनिषत् ६-१४
३. योगसूत्रम् २-२०
४. योगसूत्रम् २-२२
५. यो. सू. टीका वाचस्पतिमिश्रः २-२२
६. योगसूत्रम् ३-१८ (वेदव्यासभाष्ये)
७. न्यायसूत्रम् १-१-२२
८. do १-१-२१
९. न्यायसूत्रम् १-१-२
१०. छान्दोग्योपनिषत् ८-१२-१
११. न्यायसूत्रभाष्यम् १-१-२२
१२. न्यायवार्त्तिकतात्पर्यटीका १-१-२२
१३. माधवीयशंकरदिग्विजयः १६-६९
१४. आत्मतत्त्वविवेकः
१५. तत्त्वचिन्तामणिदीधितिः
१६. तत्त्वचिन्तामणिः
१७. ब्र. सू. शांकरभाष्यम् १-१-१
१८. श्लोकवार्त्तिके आत्मवादे १४८
१९. बृहती १-१-५
२०. भगवद्गीता ३-२६

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

२१. सूतसंहिता ४-८-२२ श्लोकव्याख्यायामुद्धृतम्
२२. तन्त्रवार्त्तिकम् १-३-८
२३. न्यायसुधा १-३-८
२४. श्लोकवार्त्तिकम् सम्बन्धाक्षेपपरिहारः १०५-१०६
२५. सर्वज्ञानोत्तरतः शैवपरिभाषायामुद्धृतानि ५ परिच्छेदः---
२६. पौष्करागमः बिन्दुपरिच्छेदः श्लो १
२७. कठोपनिषत् १-२-१५
२८. महाभाष्यम् १-१-३
२९. पाणिनीयवार्त्तिकम् १-१-१
३०. महाभाष्यम् १-१-१
३१. पणिनीयसूत्र (८-४-६८) स्योद्द्योते उद्धृता श्रुतिः
३२. वाक्यपदीये संबन्ध समुद्देशे ७२
३३. छान्दोग्योपनिषत् ७-२४-१
३४. वाक्यपदीये जातिसमुद्देशे ३३
३५. Do ३३
३६. वा. प. द्रव्यसमुद्देशे २-३
३७. पाणिनीयवार्त्तिकम् १-१-१
३८. महाभाष्यम् १-१-१
३९. वाक्यपदीये द्रव्यसमुद्देशे ७
४०. Do १५
४१. पाणिनीयसूत्रम् ६-१-१५४
४२. भगवद्गीता ६-३
४३. सूतसंहिता यज्ञवैभवखण्डे २२ अध्याये २२-२६
४४. शिवमहिम्नःस्तुतिः श्लो. ७
४५. भगवद्गीता ७-३
४६. ब्रह्मसूत्रम् १-२-१
४७. छान्दोग्योपनिषत् ३-१४-१
४८. शतश्लोकी १२
४९. भगवद्गीता १५-७
५०. Do ७-७
५१. केनोपनिषत् २-४
५२. छान्दोग्योपनिषत् ६-८-१
५३. शतश्लोकी १३

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Errata

पुटम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१२	१२	अतथता	तथता
२४	९	आत्मतत्त्वज्ञानां	आत्मतत्त्वज्ञानम्
,,	,,	तत्त्वज्ञानात्	तत्त्वज्ञानं तस्मात्
,,	,,	अपवर्गप्राप्तिः	अपवर्गः
२५	१६	विकल्पयते	वकल्प्यते
२८	१३	णात्मत	णात्मतत्त्व
३३	११	ब्रह्मे ति	ब्रह्मेति
३७	१७	निन्दाः	निन्दा
३८	१४	आध्यास्मिक-	आध्यात्मिक-
,,	१५	जपाान्	जपान्
४०	२५	व्यष्टिः ।	व्यष्टिः
,,	,,	चल	चलति
४१	१३	नुभूत्या	नुभूत्या

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सर्वेषां दर्शनानां अद्वैते तात्पर्यम्

(WITH ENGLISH TRANSLATION)

THE ADVAITIC IMPORT OF ALL DARSANAS

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

LECTURE ONE

I bow down to the preceptors of yore who explained all the Upaniṣads on the authority of Grammar (*pada*), Exegesis (*vākya*) and Logic (*pramāṇa*).

Prostrations to the adorable Śaṅkara, abode of compassion and repository of the Vedas, Smṛtis and Purāṇic lore, who brought welfare to the world.

Om. Prostrations to Brahmā and others who set the tradition of Spiritual Knowledge (*brahmavidyā*) and to the seers of yore; prostrations to the great; prostrations to the preceptors.

Contemplating on the sacred feet of His Holiness Sri Chandrasekhara Sarasvati Swamigal I shall now try to show that the purport of all the philosophical systems (*darśanas*) is the oneness of the self.

At the outset, I fold my hands reverentially over my head to Paramahamsa Parivrajakacharya, His Holiness Sri Chandrasekharendra Sarasvati Swamigal of Kanchi Kamakoti Pitha who is the embodiment of penance and whose name is fit to be chanted in the early dawn. He is the life-giver to the Vedas and the Vedic tradition. Given to the continuous and uninterrupted experience of the bliss of self which is non-dual, he has blessed a number of disciples. I shall now endeavour, to the best of my ability, to show that the final intention of all systems of thought lay in the oneness of the self.

In this context I shall remind you of the following words of Kumārila Bhaṭṭa:[1]

